793.

"[illegible]

folios 1–19 incomp.

Acc 119 // 17 folios

1

शा॰ भा॰ २ श्रीगणेशाय नमः ॐ श्रीपरमात्मने नमः युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशव
द्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिरित्यतो
स्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां चाध्यासस्तद्विपर्यये
ण विषयिणस्तद्धर्माणां च विषयेऽध्यासो मिथ्येति भवितुं युक्तं तथाप्यन्योन्यस्मिन्नन्योन्यात्मकताम
न्योन्यधर्मांश्चाध्यस्येतरेतराविवेकेनात्यंतविविक्तयोर्धर्मधर्मिणोर्मिथ्याज्ञाननिमित्तः सत्यानृते मि
थुनीकृत्याहमिदं ममेदमिति नैसर्गिकोयं लोकव्यवहारः आह कोयमध्यासो नामेति उच्यते स्मृति
रूपः परत्र पूर्वदृष्टावभासः तं केचिदन्यत्रान्यधर्माध्यासमिति वदंति केचित्तु यत्र यदध्यासस्तद्वि
वेकाग्रहणनिबंधनो भ्रम इति अन्ये तु यत्र यदध्यासस्तस्यैव विपरीतधर्मत्वकल्पनामाचक्षते सर्वथा
पि त्वन्यस्यान्यधर्मावभासतां न व्यभिचरति तथा च लोकेनुभवः शुक्तिका हि रजतवदवभासते एक
श्चन्द्रः सद्वितीयवदिति कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषयतद्धर्माणां सर्वो हि पुरोवस्थिते
विषये विषयांतरमध्यस्यति युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनोऽविषयत्वं ब्रवीषि उच्यते न तावदयमेकां
तेनाविषयः अस्मत्प्रत्ययविषयत्वात् अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः न चायमस्ति नियमः पुरोव
स्थित एव विषये विषयांतरमध्यसितव्यमिति अप्रत्यक्षेपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यंति एव उ॰ २
मविरुद्धः प्रत्यगात्मन्यप्यनात्माध्यासः तमेतमेवंलक्षणमध्यासं पंडिता अविद्येति मन्यंते तद्विवेकेन
च वस्तुस्वरूपावधारणं विद्यामाहुः तत्रैवं सति यत्र यदध्यासस्तत्कृतेन दोषेण गुणेन वाणुमात्रेणा
पि न स संबध्यते तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यव।

शा॰भा॰ लेषु सकलेषु वा अहमेव विकलः सकलो वेति बाह्यधर्मानात्मन्यध्यस्यति तथा देहधर्मान्कृशोहं स्थूलोहंति
२ ष्ठामि गच्छामि लंघयामि चेति तथेंद्रियधर्मान्मूकः काणः क्लीबो बधिरोंधोहमिति तथांतःकरणधर्मा
न्कामसंकल्पविचिकित्साध्यवसायादीन् एवमहंप्रत्ययिनमशेषस्वप्रचारसाक्षिणि प्रत्यगात्मन्यध्यस्य
तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणांतःकरणादिष्वध्यस्यति एवमयमनादिरनंतो नैसर्गिको।
ध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः अस्यानर्थहेतोः प्रहाणायात्मै
कत्वविद्याप्रतिपत्तये सर्वे वेदांता आरभ्यंते यथा चायमर्थः सर्वेषां वेदांतानां तथा वयमस्यां शारीरकमीमां
सायां प्रदर्शयिष्यामः वेदांतमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं सूत्रं अथातो ब्रह्मजिज्ञासेति
तत्राथशब्द आनंतर्यार्थः परिगृह्यते नाधिकारार्थः ब्रह्मजिज्ञासाया अनधिकार्यत्वात् मंगलस्य च वा
2 क्यार्थे समन्वयाभावात् अर्थांतरप्रयुक्त एव ह्यथशब्दः श्रुत्या मंगलप्रयोजनो भवति पूर्वप्रकृतापेक्षा
याश्च फलत आनंतर्याव्यतिरेकात् सति चानंतर्यार्थत्वे यथा धर्मजिज्ञासा पूर्ववृत्तं वेदाध्ययनं निय
मेनापेक्षते एवं ब्रह्मजिज्ञासापि यत्पूर्ववृत्तं नियमेनापेक्षते तद्वक्तव्यं स्वाध्यायानंतर्यं तु समानं नन्विह
कर्मावबोधानंतर्यं विशेषः न धर्मजिज्ञासायाः प्रागप्यधीतवेदांतस्य ब्रह्मजिज्ञासोपपत्तेः यथा च
हृदयाद्यवदानानामानंतर्यनियमः क्रमस्य विवक्षितत्वात् न तथेह क्रमो विवक्षितः शेषशेषित्वेधि उ॰
कृताधिकारे वा प्रमाणाभावात् धर्मब्रह्मजिज्ञासयोः फलजिज्ञास्यभेदाच्च अभ्युदयफलं हि धर्मज्ञा २
नं तच्चानुष्ठानापेक्षं निःश्रेयसफलं तु ब्रह्मज्ञानं न चानुष्ठानांतरापेक्षं भव्यश्च धर्मो जिज्ञास्यो न ज्ञा
नकालेस्ति पुरुषव्यापारतंत्रत्वात् इह तु भूतं ब्रह्म जिज्ञास्यं नित्यनिर्वृत्तत्वान्न पुरुषव्यापार

हा लौकिकाः वैदिकाश्च प्रवृत्ताः सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि कथं पुनरविद्यावद्विषया
णि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति उच्यते देहेंद्रियादिष्वहंममाभिमानहीनस्य प्रमातृत्वानुपप
त्तौ प्रमाणप्रवृत्त्यनुपपत्तेः नहींद्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः संभवति नचाधिष्ठानमंतरेणेंद्रि
यव्यापारः संभवति नचानध्यस्तात्मभावेन देहेन कश्चिद्व्याप्रियते नचैतस्मिन्सर्वस्मिन्नसत्यसंगस्यात्म
नः प्रमातृत्वमुपपद्यते नच प्रमातृत्वमंतरेण प्रमाणप्रवृत्तिरस्ति तस्मादविद्यावद्विषयाण्येव प्रत्यक्षा
दीनि प्रमाणानि शास्त्राणि चेति पश्वादिभिश्चाविशेषात् यथाहि पश्वादयः शब्दादिभिः श्रोत्रादीनां संबंधे
सति शब्दादिविज्ञाने प्रतिकूले जाते ततो निवर्त्तंते अनुकूले प्रवर्त्तंते यथा दंडोद्यतकरं पुरुषमभिमुखमुप
लभ्य मां हंतुमयमिच्छतीति पलायितुमारभंते हरिततृणपूर्णपाणिमुपलभ्य तं प्रत्यभिमुखीभवंति एवं
पुरुषा अपि व्युत्पन्नचित्ताः क्रूरदृष्टीनाक्रोशतः खड्गोद्यतकरान्बलवत उपलभ्य ततो निवर्त्तंते तद्विपरीता
न्प्रति अभिमुखीभवंति अतः समानः पश्वादिभिः पुरुषाणां प्रमाणप्रमेयव्यवहारः पश्वादीनां च प्रसिद्धो
ऽविवेकपूर्वकः प्रत्यक्षादिव्यवहारः तत्सामान्यदर्शनाद्व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षादिव्यवहा
रस्तत्कालः समान इति निश्चीयते शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वात्मनः परलोक
संबंधमधिक्रियते तथापि न वेदांतवेद्यमशनायाद्यतीतमपेतब्रह्मक्षत्रादिभेदमसंसार्यात्मतत्त्वमधि
कारेऽपेक्ष्यते अनुपयोगादधिकारविरोधाच्च प्राक् च तथाभूतात्मविज्ञानात् प्रवर्त्तमानं शास्त्रमविद्या
वद्विषयत्वं नातिवर्त्तते तथाहि ब्राह्मणो यजेतेत्यादीनि शास्त्राण्यात्मनि वर्णाश्रमवयोवस्थादिवि
शेषाध्यासमाश्रित्य प्रवर्त्तंते अध्यासो नाम अतस्मिंस्तद्बुद्धिरित्यवोचाम तद्यथा पुत्रभार्यादिषु विक

ब्र॰भा॰ गम्यते यतो वा इमानि भूतानि जायन्त इत्याद्याः श्रुतयः तद्विजिज्ञासस्व तद्ब्रह्मेति प्रत्यक्षमेव ब्रह्मणो जि
३ ज्ञासाकर्मत्वं दर्शयंति तच्च कर्मणि षष्ठीपरिग्रहे सूत्रेणानुगतं भवति तस्माद्ब्रह्मण इति कर्मणि षष्ठी
ज्ञातुमिच्छा जिज्ञासा अवगतिफलपर्यंतं ज्ञानं सन्वाच्याया इच्छायाः कर्म फलविषयत्वादिच्छायाः ज्ञाने
न हि प्रमाणेनावगंतुमिष्टं ब्रह्म ब्रह्मावगतिर्हि पुरुषार्थो निःशेषसंसारबीजाविद्याद्यनर्थनिवर्हणात्
तस्माद्ब्रह्म जिज्ञासितव्यं तत्पुनर्ब्रह्म प्रसिद्धमप्रसिद्धं वा स्यात् यदि प्रसिद्धं न जिज्ञासितव्यं अथाप्रसि
द्धं नैव शक्यं जिज्ञासितुमिति उच्यते अस्ति तावद्ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्तिसम
न्वितं ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयंते बृहतेर्धातोरर्थानुगमात् सर्वस्यात्म
त्वाच्च ब्रह्मास्तित्वप्रसिद्धिः सर्वो ह्यात्मास्तित्वं प्रत्येति न नाहमस्मीति यदि हि नात्मास्तित्वप्रसिद्धिः स्यात्
सर्वो पि लोको नाहमस्मीति प्रतीयात् आत्मा च ब्रह्म यदि तर्हि लोके ब्रह्मात्मत्वेन प्रसिद्धमस्ति ततो ज्ञा
तमेवेत्यजिज्ञास्यत्वं पुनरापन्नं न तद्विशेषं प्रति विप्रतिपत्तेः देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृता
जनाः लोकायतिकाश्च प्रतिपन्नाः इंद्रियाण्येव चेतनान्यात्मेत्यपरे मन इत्यन्ये विज्ञानमात्रं क्षणि
कमित्येके शून्यमित्यपरे अस्ति देहादिव्यतिरिक्तः संसारी कर्ता भोक्तेत्यपरे भोक्तैव केवलं न कर्तेत्येके
अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचित् आत्मा स भोक्तुरित्यपरे एवं बहवो विप्र ३.
तिपन्नाः युक्तिवाक्यतदाभाससमाश्रयाः संतः तत्राविचार्य यत्किंचित्प्रतिपद्यमानो निःश्रेयसात्
प्रतिहन्येतानर्थं चेयात् तस्माद्ब्रह्मजिज्ञासोपन्यासमुखेन वेदांतवाक्यमीमांसा तदविरोधितर्को
पकरणा निःश्रेयसप्रयोजना प्रस्तूयते ब्रह्म जिज्ञासितव्यमित्युक्तं किंलक्षणं पुनस्तद्ब्रह्मेत्यत

तत्र च चोदनाप्रवृत्तिभेदाच्च या हि चोदना धर्मस्य लक्षणं सा स्वविषये नियुञ्जानैव पुरुषमवबोधयति ब्रह्म
चोदना तु पुरुषमवबोधयत्येव केवलमवबोधस्य चोदनाजन्यत्वान्न पुरुषोऽवबोधे नियुज्यते यथाक्षा
र्थसंनिकर्षेणार्थावबोधे तद्वत् तस्मात्किमपि वक्तव्यं यदनंतरं ब्रह्मजिज्ञासोपदिश्यत इति उच्यते नि
त्यानित्यवस्तुविवेकः इहामुत्रार्थफलभोगविरागः शमदमादिसाधनसंपत् मुमुक्षुत्वं चेति तेषु हि
सत्सु प्रागपि धर्मजिज्ञासाया ऊर्द्ध्वं च शक्यते ब्रह्म जिज्ञासितुं ज्ञातुं च न विपर्यये तस्मादथशब्देन यथो।
क्तसाधनसंपत्त्यानंतर्यमुपदिश्यते अतःशब्दो हेत्वर्थः यस्माद्वेद एवाग्निहोत्रादीनां श्रेयःसाधनाना
मनित्यफलतां दर्शयति तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयत इत्या
दि तथा ब्रह्मविज्ञानादपि परं पुरुषार्थं दर्शयति ब्रह्मविदाप्नोति परमित्यादि तस्माद्यथोक्तसाधनसं
पत्त्यनंतरं ब्रह्मजिज्ञासा कर्त्तव्या ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा ब्रह्म च वक्ष्यमाणलक्षणं जन्माद्यस्य यत इति अत ए
व न ब्रह्मशब्दस्य जात्याद्यर्थान्तरमाशंकितव्यं ब्रह्मण इति कर्मणि षष्ठी न शेषे जिज्ञास्यापेक्षत्वाज्जिज्ञा
सायाः जिज्ञास्यान्तरानिर्देशाच्च ननु शेषषष्ठीपरिग्रहेपि ब्रह्मणो जिज्ञासाकर्मत्वं न विरुध्यते संबंध
सामान्यस्य विशेषनिष्ठत्वात् एवमपि प्रत्यक्षं ब्रह्मणः कर्मत्वमुत्सृज्य सामान्यद्वारेण परोक्षं ब्रह्मणः
कर्मत्वं कल्पयतो व्यर्थः प्रयासः स्यात् न व्यर्थः ब्रह्माश्रिताशेषविचारप्रतिज्ञानार्थत्वादिति चेत् न प्र
धानपरिग्रहे तदपेक्षितानामर्थाक्षिप्तत्वात् ब्रह्म हि ज्ञानेनाप्तुमीप्सिततमत्वात्प्रधानं तस्मिन्प्रधा
ने जिज्ञासाकर्मणि परिगृहीते यैर्जिज्ञासितैर्विना ब्रह्मजिज्ञासितं न भवति तान्यर्थाक्षिप्तान्येवेति न
पृथक्सूत्रयितव्यानि यथा राजासौ गच्छतीत्युक्ते सपरिवारस्य राज्ञो गमनमुक्तं भवति तद्वत् श्रुत्यनु

ब्र॰भा॰ ५

श्रुतिः पंडितो मेधावी गंधारानेवोपसंपद्येतैवमेवेहाचार्यवान्पुरुषो वेदेति च पुरुषबुद्धिसाहाय्य
मात्मनो दर्शयति न धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासायां किं तु श्रुत्यादयोऽनुभ
वादयश्च यथासंभवमिह प्रमाणं अनुभवावसानत्वाद्भूतवस्तुविषयत्वाच्च ब्रह्मविज्ञानस्य कर्त
व्ये हि विषये नानुभवापेक्षास्तीति श्रुत्यादीनामेव प्रामाण्यं स्यात् पुरुषाधीनात्मलाभत्वाच्च कर्तव्यस्य
कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं लौकिकं वैदिकं च कर्म यथाऽश्वेन गच्छति पद्भ्यामन्यथा वा न वा गच्छ
तीति तथातिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णाति उदिते जुहोति अनुदिते जुहो
तीति विधिप्रतिषेधाश्चात्रार्थवंतः स्युर्विकल्पोत्सर्गापवादाश्च न तु वस्त्वेवं नैवमस्ति नास्तीति वा वि
4 कल्प्यते विकल्पनास्तु पुरुषबुद्ध्यपेक्षाः न वस्तुयाथात्म्यज्ञानं पुरुषबुद्ध्यपेक्षं किं तर्हि वस्तुतंत्र
मेव तत् न हि स्थाणावेकस्मिन्स्थाणुर्वा पुरुषोऽन्यो वेति तत्त्वज्ञानं भवति तत्र पुरुषोऽन्यो वे
ति मिथ्याज्ञानं स्थाणुरेवेति तत्त्वज्ञानं वस्तुतंत्रत्वात् एवंभूतवस्तुविषयाणां प्रामाण्यं वस्तुतंत्रं
तत्रैवं सति ब्रह्मज्ञानमपि वस्तुतंत्रमेव भूतवस्तुविषयत्वात् ननु भूतवस्तुत्वे ब्रह्मणः प्रमाणां
तरविषयत्वमेवेति वेदांतवाक्यविचारणानर्थिकैव प्राप्ता न इंद्रियाविषयत्वेन संबंधाग्रहणात्
स्वभावतो विषयविषयाणींद्रियाणि न ब्रह्मविषयाणि सति हींद्रियविषयत्वे ब्रह्मण इदं ब्रह्मणा संब उ॰ ५
द्धं कार्यमिति गृह्येत कार्यमात्रमेव गृह्यमाणं किं ब्रह्मणा संबद्धं किमन्येन केनचिद्वा संबद्धमिति
न शक्यं निश्चेतुं तस्माज्जन्मादिसूत्रं नानुमानोपन्यासार्थं किं तर्हि वेदांतवाक्यप्रदर्शनार्थं किं
पुनस्तद्वेदांतवाक्यं यत्सूत्रेणेह लिलक्षयिषितं भृगुर्वै वारुणिर्वरुणं पितरमुपससार।

आह भगवान् सूत्रकारः जन्माद्यस्य यतः २ जन्मोत्पत्तिरादिरस्येति तद्गुणसंविज्ञानो बहुव्रीहिः जन्मस्थि
तिभंगं समासार्थः जन्मनश्चादित्वं श्रुतिनिर्देशापेक्षं वस्तुवृत्तापेक्षं च श्रुतिनिर्देशस्तावत् यतो वा इमानि
भूतानि जायंत इत्यस्मिन्वाक्ये जन्मस्थितिप्रलयानां क्रमदर्शनात् वस्तुवृत्तमपि जन्मना लब्धसत्ताकस्य ध।
र्मिणः स्थितिप्रलयसंभवात् अस्येति प्रत्यक्षादिसंनिधापितस्य धर्मिण इदमा निर्देशः षष्ठी जन्मादिधर्मसं
बंधार्था यत इति कारणनिर्देशः अस्य जगतो नामरूपाभ्यां व्याकृतस्यानेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदे
शकालनिमित्तक्रियाफलाश्रयस्य मनसाप्यचिंत्यरचनारूपस्य जन्मस्थितिभंगं यतः सर्वज्ञात्सर्वशक्तेः कार
णाद्भवति तद्ब्रह्मेति वाक्यशेषः अन्येषामपि भावविकाराणां त्रिष्वेवांतर्भाव इति जन्मस्थितिनाशानामिह
ग्रहणं यास्कपरिपठितानां तु जायतेऽस्तीत्यादीनां ग्रहणे तेषां जगतः स्थितिकाले संभाव्यमानत्वान्मूल
कारणादुत्पत्तिस्थितिनाशाः जगतो न गृहीताः स्युरित्याशंक्येत तन्मा शंकि या उत्पत्तिर्ब्रह्मणस्तत्रैव स्थि
तिः प्रलयश्च त एव गृह्यंते न यथोक्तविशेषणस्य जगतो यथोक्तविशेषणमीश्वरं मुक्त्वान्यतः प्रधानादचेतना।
दणुभ्यो वा अभावात् संसारिणो वा उत्पत्त्यादि संभावयितुं शक्यं न च स्वभावतः विशिष्टदेशकालनिमि
त्तोपादानात् एतदेवानुमानं संसारव्यतिरिक्तेश्वरास्तित्वादिसाधनमीश्वरकारणिनो मन्यंते नन्वि
हापि तदेवोपन्यस्तं जन्मादिसूत्रेण वेदांतवाक्यकुसुमग्रथनार्थत्वात्सूत्राणां (एतदेवानुमानं) वेदांतवाक्या
नि सूत्रैरुदाहृत्य विचार्यंते वाक्यार्थविचारणाध्यवसाननिर्वृत्ता हि ब्रह्मावगतिः नानुमानादिप्रमा।
णांतरनिर्वृत्ता सत्सु वेदांतवाक्येषु जन्मादिकारणवादिषु तदर्थग्रहणदार्ढ्यायानुमानमपि वेदांत
वाक्याविरोधि प्रमाणं भवन्न निवार्यते श्रुत्यैव च सहायत्वेन तर्कस्याभ्युपेतत्वात् श्रोतव्यो मंतव्य इति

या॰भा॰
५

[illegible] ब्रह्मैवितुमिदं [illegible] शास्त्रयोनित्वादिति ३ कथं पुनर्ब्रह्मणः शास्त्र
प्रमाणकत्वमुच्यते यावता आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति क्रियापरत्वं शास्त्रस्य प्र
दर्शितं अतो वेदांतानामानर्थक्यं अक्रियार्थत्वात् कर्तृदेवतादिप्रकाशनार्थत्वेन वा क्रियाविधिशेष
त्वं उपासनादिक्रियांतर[illegible]विधानार्थत्वं वा नहि परिनिष्ठितवस्तुप्रतिपादनं संभवति प्रत्यक्षादिविषयत्वा
त् परिनिष्ठितवस्तुनः तत्प्रतिपादने च हेयोपादेयरहिते पुरुषार्थत्वाभावात् अत एव सोरोदीदित्ये
वमादीनामानर्थक्यं माभूदिति विधिनात्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनांस्युरिति स्तावकत्वेनार्थवत्त्वमु
क्तं मंत्राणां च इषेत्वेत्यादीनां क्रियातत्साधनाभिधायित्वेन कर्मसमवायित्वमुक्तं नक्वचिदपि वेद
वाक्यानां विधिसंस्पर्शमंतरेणार्थवत्ता दृष्टा उपपन्ना वा नच परिनिष्ठिते वस्तुस्वरूपे विधिः संभव
ति क्रियाविषयत्वाद्विधेः तस्मात्कर्मापेक्षितकर्तृस्वरूपदेवतादिप्रकाशनेन क्रियाविधिशेष
त्वं वेदांतानां अथ प्रकरणांतरभयान्नैतदभ्युपगम्यते तथापि स्ववाक्यगतोपासनादिकर्मपर
त्वं तस्मान्न ब्रह्मणः शास्त्रयोनित्वमेव प्राप्ते उच्यते ३ तत्तु समन्वयात् ४ तुशब्दः पूर्वपक्षव्या
वृत्त्यर्थः तद्ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं वेदांतशास्त्रादेवावगम्यते कथं
समन्वयात् सर्वेषु हि वेदांतेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानि उ॰
सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं आत्मा वा इदमेक एवाग्र आसीत् तदेतद्ब्रह्मापूर्वमन ५
परमनंतरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः ब्रह्मैवेदममृतं पुरस्तादित्यादीनि नच तद्गता।
नां पदानां ब्रह्मस्वरूपविषये निश्चिते समन्वयेऽवगम्यमानेऽर्थांतरकल्पना युक्ता श्रुतहान्

धीहि भगवो ब्रह्मेत्युपसन्नमाह यतो वा इमानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति तद्वि
जिज्ञासस्व तद्ब्रह्मेति तस्य च निर्णयवाक्यं आनंदो ब्रह्मेति व्यजानात् आनंदाद्ध्येव खल्विमानि भूतानि जायंते आनंदेन जातानि
जीवंति आनंदं प्रयंत्यभिसंविशंतीति अन्यान्यप्येवंजातीयकानि वाक्यानि नित्यशुद्धबुद्धमुक्तस
र्वज्ञस्वरूपकारणविषयाण्युदाहर्तव्यानि २ जगत्कारणत्वप्रदर्शनेन सर्वज्ञं ब्रह्मेत्युपक्षिप्तं
तदेव दृढयन्नाह शास्त्रयोनित्वादिति ३ महत ऋग्वेदादेः शास्त्रस्यानेकविद्यास्थानोपबृंहित
स्य प्रदीपवत् सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म न हीदृशस्य शास्त्रस्य ऋग्वेदादि
लक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञादन्यतः संभवोस्ति यद्यद्विस्तरार्थं शास्त्रं यस्मात्पुरुषविशेषा।
त्संभवति यथा व्याकरणादि पाणिन्यादेः ज्ञेयैकदेशार्थमपि स ततोप्यधिकतरविज्ञान इति प्र
सिद्धं लोके किमु वक्तव्यमनेकशाखाभेदभिन्नस्य देवतिर्यङ्मनुष्यवर्णाश्रमादिप्रविभागहेतोः
ऋग्वेदाद्याख्यस्य सर्वज्ञानाकरस्याप्रयत्नेनैव लीलान्यायेन पुरुषनिश्वासवद्यस्मान्महतो भू
ताद्योनेः संभवः अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद इत्यादिश्रुतेः तस्य महतो भूतस्य
निरतिशयं सर्वज्ञत्वं सर्वशक्तिमत्त्वं चेति अथवा यथोक्तमृग्वेदादिशास्त्रं योनिः कारणं प्रमा
णमस्य ब्रह्मणो यथावत्स्वरूपाधिगमे शास्त्रादेव प्रमाणाज्जगतो जन्मादिकारणं ब्रह्माधिग
म्यत इत्यभिप्रायः शास्त्रमुदाहृतं पूर्वसूत्रे यतो वा इमानि भूतानि जायंत इत्यादि किमर्थं तर्ही
दं सूत्रं यावता पूर्वसूत्रेणैवंजातीयकं शास्त्रमुदाहृतं शास्त्रयोनित्वं ब्रह्मणो दर्शितं उच्यते
तत्र सूत्राक्षरेण स्पष्टं शास्त्रस्यानुपादानाज्जन्मादिसूत्रे केवलमनुमानमुपन्यस्तमित्या

ब्र·भा·
६

[illegible]स्य ब्रह्मज्ञानं विधीयत इति युक्तं नन्विह जिज्ञास्यवैल
क्षण्यमुक्तं कर्मकांडे भव्यो धर्मो [illegible] नित्यनिर्वृत्तं ब्रह्मजिज्ञास्यमिति तत्र धर्मज्ञानफला
दनुष्ठानापेक्षाद्विलक्षणं [illegible] भवितुमर्हतीति नार्हत्येवं भवितुं कार्यविधिप्रयुक्तस्यैव ब्रह्मणः प्रति
पाद्यमानत्वात् आत्मा वा अरे द्र[illegible]य आत्मापहतपाप्मा सोऽन्वेष्टव्यः स विजिज्ञासितव्यः आत्मेत्येवोपा
सीत आत्मानमेव लोकमुपासीत [illegible] ब्रह्मैव भवतीत्यादिषु विधानेषु सत्सु कोऽसावात्मा किं तद्ब्रह्मेत्याकांक्षा
यां तत्स्वरूपसमर्पणेन सर्वे वे[illegible]उपयुक्ता नित्यः सर्वज्ञः सर्वगतो नित्यतृप्तो नित्यशुद्धबुद्धमुक्तस्वभा
वो विज्ञानमानंदं ब्रह्मेत्येवमादयः तदुपासनाच्च शास्त्रदृष्टोऽदृष्टो मोक्षः फलं भविष्यतीति कर्तव्यविध्यनन
6 प्रवेशे तु वस्तुमात्रकथने हानोपादानासंभवात् सप्तद्वीपा वसुमती राजासौ गच्छतीत्यादिवाक्यवद्वेदान्तवाक्या
नामानर्थक्यमेव स्यात् ननु वस्तुमात्रकथनेऽपि रज्जुरियं नायं सर्प इत्यादौ भ्रान्तिजनितभीतिनिवर्तनेना
र्थवत्त्वं दृष्टं तथेहाप्यसंसार्यात्मवस्तुकथनेन संसारित्वभ्रान्तिनिवर्तनेनार्थवत्त्वं स्यात् स्यादेतदेवं यदि र
ज्जुस्वरूपश्रवण इव सर्पभ्रान्तिः संसारित्वभ्रान्तिर्ब्रह्मस्वरूपश्रवणमात्रेण निवर्तेत न तु निवर्तते श्रु
तब्रह्मणोऽपि यथापूर्वं सुखदुःखादिसंसारधर्मदर्शनात् श्रोतव्यो मंतव्यो निदिध्यासितव्य इति च श्रव
णोत्तरकालयोर्मनननिदिध्यासनयोर्दर्शनात् तस्मात्प्रतिपत्तिविधिविषयतयैव शास्त्रप्रमाणकं ब्र । उ·
ह्माभ्युपगंतव्यमिति अत्राभिधीयते न कर्मब्रह्मविद्याफलयोर्वैलक्षण्यात् शारीरं वाचिकं मानसं च क ६
र्म श्रुतिस्मृतिप्रसिद्धं धर्माख्यं यद्विषया जिज्ञासा अथातो धर्मजिज्ञासेति सूत्रिता अधर्मोऽपि हिंसादिः प्रति
षेधचोदनालक्षणत्वाज्जिज्ञास्यः परिहाराय तयोश्चोदनालक्षणयोरर्थानर्थयोः धर्माधर्मयोः फले

श्रुतकल्पनाप्रसंगात् न च तेषां कर्तृस्वरूपप्रतिपादनपरतावसीयते तत्केन कं पश्येदित्यादिक्रि
याकारकफलनिराकरणश्रुतेः न च परिनिष्ठितवस्तुस्वरूपत्वेपि प्रत्यक्षादिविषयत्वं तत्वमसी
ति ब्रह्मात्मभावस्य शास्त्रमंतरेणानवगम्यमानत्वात् यत्तु हेयोपादेयरहितत्वादुपदेशानर्थक्य
मिति नैष दोषः हेयोपादेयशून्यब्रह्मात्मावगमादेव सर्वक्लेशप्रहाणात्पुरुषार्थसिद्धेः देवता
दिप्रतिपादनस्य तु स्ववाक्यगतोपासनार्थत्वेपि न कश्चिद्विरोधः न तु तथा ब्रह्मण उपासनाविधिशेष
त्वं संभवति एकत्वे हेयोपादेयशून्यतया क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः न ह्येकत्ववि
ज्ञानेनोन्मथितस्य द्वैतविज्ञानस्य पुनः संभवोस्ति येनोपासनाविधिशेषत्वं ब्रह्मणः प्रतिपद्येत य
द्यप्यन्यत्र वेदवाक्यानां विधिसंस्पर्शमंतरेण प्रमाणत्वं न दृष्टं तथाप्यात्मविज्ञानस्य फलपर्यंतत्वा
न्न तद्विषयस्य शास्त्रस्य प्रामाण्यं शक्यं प्रत्याख्यातुं न चानुमानगम्यं शास्त्रप्रामाण्यं येनान्यत्र दृष्टं नि
दर्शनमपेक्षेत तस्मात्सिद्धं ब्रह्मणः शास्त्रप्रमाणकत्वं अत्रापरे प्रत्यवतिष्ठंते यद्यपि शास्त्रप्रमाण
कं ब्रह्म तथापि प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते यथा यूपाहवनीयादीन्यलौकिकान्य
पि विधिशेषतया शास्त्रेण समर्प्यंते तद्वत् कुत एतत् प्रवृत्तिनिवृत्तिप्रयोजनत्वाच्छास्त्रस्य त
था हि शास्त्रतात्पर्यविद आहुः दृष्टो हि तस्यार्थः कर्मावबोधनं चोदनेति क्रियायाः प्रवर्तकं वचनं तस्य ज्ञा
नमुपदेशः तद्भूतानां क्रियार्थेन समाम्नायः आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति च अ
तः पुरुषं क्वचिद्विषयविशेषे प्रवर्तयत्कुतश्चिद्विषयविशेषान्निवर्तयच्चार्थवच्छास्त्रं तच्छेषतया चा
न्यदुपयुक्तं तत्सामान्याद्वेदान्तानामपि तथैवार्थवत्वं स्यात् सति च विधिपरत्वे यथा स्वर्गादिका

शा॰ भा॰ [illegible] विक्रियमाणेपि सर्वविक्रियारहितं नित्यतृप्तं नि
२ रवयवं स्वयंज्योतिःस्व[illegible]धर्माधर्मौ सह कार्येण कालत्रयं च नोपावर्त्तेते तदशरीरत्वं मोक्षाख्यं
अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतादन्यत्र भूताच्च भव्याच्चेत्यादिश्रुतिभ्यः अतस्तद्ब्रह्म
यस्येयं जिज्ञासा प्रस्तुता तद्यदि कर्त्तव्यशेषत्वेनोपदिश्येत तेन कर्त्तव्येन साध्यश्चेन्मोक्षोभ्युपग।
म्येत अनित्य एव स्यात् तत्रैवं सति यथोक्तकर्मफलेष्वेव तारतम्यावस्थितेष्वनित्येषु कश्चिदतिश।
यो मोक्ष इति प्रसज्येत नित्यश्च मोक्षः सर्वैर्मोक्षवादिभिरभ्युपगम्यते अतो न कर्त्तव्यशेषत्वेन ब्र
ह्मोपदेशो युक्तः अपि च ब्रह्म वेद ब्रह्मैव भवति क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे आनन्दं ब्रह्म
7 णो विद्वान्न बिभेति कुतश्चनेति अभयं वै जनक प्राप्तोसि तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्स
र्वमभवत् तत्र को मोहः कः शोक एकत्वमनुपश्यत इत्येवमाद्याः श्रुतयो ब्रह्मविद्यानन्तरं मोक्षं दर्शयन्त्यो मध्ये
कार्यान्तरं वारयंति तथा तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेहं मनुरभवं सूर्यश्चेति ब्रह्म
दर्शनसर्वात्मभावयोर्मध्ये कर्त्तव्यान्तरवारणायोदाहार्यं यथा तिष्ठन्गायतीति तिष्ठतिगायत्यो
र्मध्ये तत्कर्तृकं कार्यान्तरं नास्तीति गम्यते त्वं हि नः पिता योस्माकमविद्यायाः परं पारं तारयसि
श्रुतं ह्येव मे भगवद्दृशेभ्यः तरति शोकमात्मविदिति सोहं भगवः शोचामि तं मा भगवाञ्छो ३॰
कस्य पारं तारयत्विति तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान्सनत्कुमार इति चैवमा १
द्याः श्रुतयो मोक्षप्रतिबन्धनिवृत्तिमात्रमेवात्मज्ञानस्य फलं दर्शयन्ति तथा चाचार्यप्रणीतं न्या
योपबृंहितं सूत्रं दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपव

प्रत्यक्षे सुखदुःखे शरीरवाङ्मनोभिरुपभुज्यमाने विषयेन्द्रियसंयोगजन्ये ब्रह्मादिषु स्थावरान्तेषु प्रसिद्धे
मनुष्यत्वादारभ्य ब्रह्मान्तेषु देहवत्सु सुखतारतम्यमनुश्रूयते ततश्च तद्धेतोर्धर्मस्य तारतम्यं गम्यते
धर्मतारतम्यादधिकारितारतम्यं प्रसिद्धं चार्थित्वसामर्थ्यविद्वत्तादिकृतमधिकारितारतम्यं तथा च
यागाद्यनुष्ठायिनामेव विद्यासमाधिविशेषादुत्तरेण पथा गमनं केवलैरिष्टापूर्तदत्तसाधनैर्धू
मादिक्रमेण दक्षिणेन पथा गमनं तत्रापि सुखतारतम्यं च यावत्संपातमुषित्वेत्यस्माद्गम्यते तथा
मनुष्यादिषु नारकस्थावरान्तेषु सुखलवश्चोदनालक्षणधर्मसाध्य एवेति गम्यते तारतम्येन वर्तमा
नः तथोर्ध्वगतेष्वधोगतेषु च देहवत्सु दुःखतारतम्यदर्शनात्तद्धेतोरधर्मस्य प्रतिषेधचोदनालक्ष
णस्य तदनुष्ठायिनां च तारतम्यं गम्यते एवमविद्यादिदोषवतां धर्माधर्मतारतम्यनिमित्तं शरीरोपादानपू
र्वकं सुखदुःखतारतम्यमनित्यं संसाररूपं श्रुतिस्मृतिन्यायप्रसिद्धं तथा च श्रुतिः न वै सशरीरस्य सतः
प्रियाप्रिययोरपहतिरस्तीति यथावर्णितं संसाररूपमनुवदति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृ
शत इति प्रियाप्रियस्पर्शनप्रतिषेधाच्चोदनालक्षणधर्मकार्यत्वं मोक्षाख्यस्याशरीरत्वस्य प्रतिषि
ध्यत इति गम्यते धर्मकार्यत्वे हि प्रियाप्रियस्पर्शनप्रतिषेधो नोपपद्यते अशरीरत्वमेव धर्मकार्य
मिति चेत् न तस्य स्वाभाविकत्वात् अशरीरं शरीरेष्वनवस्थेष्ववस्थितं महान्तं विभुमात्मानं मत्वा
धीरो न शोचति अप्राणो ह्यमनाः शुभ्रः असङ्गो ह्ययं पुरुष इत्यादिश्रुतिभ्यः अत एवानुष्ठेयफलवि
लक्षणं मोक्षाख्यमशरीरत्वं नित्यमिति सिद्धं तत्र किंचित्परिणामिनित्यं यस्मिन् विक्रियमा
णेऽपि तदेवेदमिति बुद्धिर्न विहन्यते यथा पृथिव्यादिजगन्नित्यत्ववादिनां यथा च सांख्यानां गु

ब्र॰भा॰ ८

हितं वेदितव्यं दिनेष्टमादिष्टं इ...यति तथा च शास्त्रं यस्यामतं तस्य मतं मतं यस्य न वेद सः अ
विज्ञातं विजानतां विज्ञातमविजानतां ... न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारं शृणुयाः न मतेर्मन्तारं मन्वी
थाः न विज्ञातेर्विज्ञातारं विजानीयाः इति चैवमादि अतो विद्याकल्पितसंसारित्वनिवर्त्तनेन नित्यमुक्ता
त्मस्वरूपसमर्पणान्न मोक्षस्यानित्यत्वदोषः यस्य तूत्पाद्यो मोक्षस्तस्य मानसं वाचिकं वा कार्य्य
मपेक्षत इति युक्तं तथा विकार्य्यत्वे च तयोः पक्षयोर्मोक्षस्य ध्रुवमनित्यत्वं न हि दध्यादि कार्य्यमुत्पा
द्यं वा घटादि नित्यं दृष्टं लोके न चाप्यत्वेनापि कार्य्यापेक्षा स्वात्मस्वरूपत्वे सत्यनाप्यत्वात् स्वरूपव्यतिरि
क्तत्वेपि ब्रह्मणो नाप्यत्वं सर्वगतत्वेन नित्याप्तस्वरूपत्वात् सर्वेण ब्रह्मणः आकाशस्येव नापि संस्कार्यो मो
8 क्षः येन व्यापारमपेक्षेत संस्कारो हि नाम संस्कार्य्यस्य गुणाधानेन वा स्याद्दोषापनयनेन वा न तावद्गु
णाधानेन संभवति अनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य नापि दोषापनयनेन नित्यशुद्धब्रह्म
स्वरूपत्वान्मोक्षस्य स्वात्मधर्म एव संस्तिरोभूतो मोक्षः क्रियया आत्मनि संस्क्रियमाणे अभिव्यज्यते
यथादर्शे निघर्षणक्रियया संस्क्रियमाणे भास्वरत्वधर्म इति चेन्न क्रियाश्रयत्वानुपपत्तेरात्मनः य
दाश्रया क्रिया तमविकुर्वती नैवात्मानं लभते यद्यात्मा क्रियया विक्रियेत अनित्यत्वमात्मनः प्रसज्येत
अविकार्योयमुच्यत इति चैवमादीनि वाक्यानि बाध्येरन् तच्चानिष्टं तस्मान्न स्वाश्रया क्रिया आत्मनः उ॰
संभवति अन्याश्रयायास्तु क्रियाया अविषयत्वान्न तया आत्मा संस्क्रियते ननु देहाश्रयया स्नाना ८
चमनयज्ञोपवीतधारणादिक्रियया देही संस्क्रियमाणो दृष्टः न देहादिसंहतस्यैवाविद्यागृहीत
स्यात्मनः संस्क्रियमाणत्वात् प्रत्यक्षं हि स्नानाचमनादेर्देहसमवायित्वं तया देहाश्रयया तत्संहत

यं इति मिथ्याज्ञाना [illegible] मोहं [illegible] मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानाद्भवति न चेदं ब्रह्मा
त्मकत्वविज्ञानं संपद्रूपं यथा अनन्तं वै मनोऽनन्ता विश्वे देवा अनन्तमेव स तेन लोकं जयतीति न चाध्यास
रूपं यथा मनो ब्रह्मेत्युपासीत आदित्यो ब्रह्मेत्यादेश इति च मनआदित्यादिषु ब्रह्मदृष्ट्यध्यासः नापि विशि
ष्टक्रियायोगनिमित्तं वायुर्वाव संवर्गः प्राणो वाव संवर्ग इतिवत् नाप्याज्यावेक्षणादिवत्कर्माङ्ग
संस्काररूपं संपदादिरूपे हि ब्रह्मात्मैकत्वविज्ञानेऽभ्युपगम्यमाने तत्त्वमसि अहं ब्रह्मास्मि अयमात्मा ब्रह्मेति
एवमादीनां वाक्यानां ब्रह्मात्मैकत्ववस्तुप्रतिपादनपरः पदसमन्वयः पीड्येत भिद्यते हृदयग्रन्थिः
छिद्यन्ते सर्वसंशयाः इति चैवमादीनि अविद्यानिवृत्तिफलश्रवणान्युपरुध्येरन् ब्रह्म वेद ब्रह्मैव भव
तीति चैवमादीनि तद्भावापत्तिवचनानि संपदादिपक्षे न सामञ्जस्येनोपपद्येरन् तस्मान्न संप
दादिरूपं ब्रह्मात्मैकत्वविज्ञानं अतो न पुरुषव्यापारतन्त्रा ब्रह्मविद्या किं तर्हि प्रत्यक्षादिप्रमाणविष
यवस्तुज्ञानवद्वस्तुतन्त्रैव एवंभूतस्य ब्रह्मणस्तज्ज्ञानस्य च न कयाचिद्युक्त्या शक्यः कार्यानुप्र
वेशः कल्पयितुं न च विदिक्रियाकर्मत्वेन कार्यानुप्रवेशो ब्रह्मणः अन्यदेव तद्विदितादथो अ
विदितादधि इति विदिक्रियाकर्मत्वप्रतिषेधात् येनेदं सर्वं विजानाति तं केन विजानीयादिति च
तथोपास्तिक्रियाकर्मत्वप्रतिषेधोऽपि भवति यद्वाचानभ्युदितं येन वागभ्युद्यते इति अविष
यत्वं ब्रह्मण उपन्यस्य तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते इति अविषयत्वे ब्रह्मणः शास्त्र
योनित्वानुपपत्तिरिति चेत् न अविद्याकल्पितभेदनिवृत्तिपरत्वात् शास्त्रस्य न हि शास्त्रमिदंतया
विषयभूतं ब्रह्म प्रतिपिपादयिषति किं तर्हि प्रत्यगात्मत्वेनाविषयतया प्रतिपादयदविद्याक

शा·भा· किंचिज्ज्ञत्वंवाकल्प्येततथाचत्रिगुणत्वात्प्रधानस्यसर्वज्ञानकारणभूतंसत्त्वंप्रधानावस्थायामपिविद्यत
१२ इतिप्रधानस्याचेतनस्यैवसतःसर्वज्ञत्वमुपचर्यतेवेदांतेष्ववश्यंचत्वयापिसर्वज्ञंब्रह्माभ्युपगछतास
र्वज्ञानशक्तिमत्त्वेनैवसर्वज्ञत्वमभ्युपगंतव्यं नहिसर्वविषयंज्ञानंकुर्वदेवब्रह्मवर्त्ततेतथाहिज्ञानस्यनि।
त्यत्वेज्ञानक्रियांप्रतिस्वातंत्र्यंब्रह्मणोहीयेत अथानित्यंतदितिज्ञानक्रियायाउपरमेनापिब्रह्मतदासर्व
ज्ञानशक्तिमत्त्वेनैवसर्वज्ञत्वमापतति अपिचप्रागुत्पत्तेःसर्वकारकशून्यंब्रह्मेष्यतेत्वया नचज्ञानसा
धनानांशरीरेंद्रियादीनामभावेज्ञानोत्पत्तिकस्यचिदुपपन्ना अपिचप्रधानस्यानेकात्मकस्यपरिणाम
संभवात्कारणत्वोपपत्तिर्मृदादिवत्नासंहतस्यैकात्मकस्यब्रह्मणइत्येवंप्राप्तइदंसूत्रमारभ्यते ई
9 क्षतेर्नाशब्दं ५ नसांख्यप्रकल्पितमचेतनंप्रधानंजगतःकारणंशक्यंवेदांतेष्वाश्रयितुंअशब्दंहित
त्कथमशब्दत्वंईक्षतेरीक्षितृत्वश्रवणात्कारणस्यकथमेवंहिश्रूयतेसदेवसोम्येदमग्रआसीदेकमे
वाद्वितीयमित्युपक्रम्यतदैक्षतबहुस्यांप्रजायेयेतितत्तेजोसृजतेतितत्रेदंशब्दवाच्यंनामरूपव्याकृ
तंजगत्प्रागुत्पत्तेःसदात्मनावधार्यतस्यैवप्रकृतस्यसच्छब्दवाच्यस्येक्षणपूर्वकंतेजःप्रभृतेःस्रष्टृ
त्वंदर्शयति तथान्यत्रआत्मावाइदमेकएवाग्रआसीत्नान्यत्किंचनमिषत्सऐक्षतलोकान्नुसृजा
इतिसइमांल्लोकानसृजतेतीक्षणपूर्विकामेवसृष्टिमाचष्टेक्वचिच्चषोडशकलंपुरुषंप्रस्तुत्याह उ·
सईक्षांचक्रेसप्राणमसृजतेतीक्षापूर्विकामेवसृष्टिमाचष्टेईक्षतेरितिचधात्वर्थनिर्देशोऽभिप्रे १२
तोयजतेरितिवत्नधातुनिर्देशःतेनयःसर्वज्ञःसर्वविद्यस्यज्ञानमयंतपस्तस्मादेतद्ब्रह्मनामरूप
मन्नंचजायतेइत्येवमादीन्यपिसर्वज्ञेश्वरकारणपराणिवाक्यान्युदाहर्तव्यानि यत्तूक्तंसत्त्वधर्मे

प्रमातृकाणि प्रमाणानि च भवितुमर्हंतीति अपि चाहुः गौणमिथ्यात्मनोऽसत्वे पुत्रदेहादिबाधनात् सद्ब्रह्मात्मा
हमित्येवं बोधे कार्यं कथं भवेत् अन्वेष्टव्यात्मविज्ञानात्प्राक्प्रमातृत्वमात्मनः अन्विष्टः स्यात्प्रमातैव पाप्मदोषादि
वर्जितः देहात्मप्रत्ययो यद्वत्प्रमाणत्वेन कल्पितः लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयादिति एवं ताव
द्वेदांतवाक्यानां ब्रह्मात्मावगतिप्रयोजनानां ब्रह्मात्मनि तात्पर्येण समन्वितानामंतरेणापि कार्यानुप्रवेशं ब्रह्मणि प
र्यवसानमुक्तं ब्रह्म च सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिनाशकारणमित्युक्तं सांख्यादयस्तु परिनिष्ठि
तं वस्तु प्रमाणांतरगम्यमेवेति मन्यमानाः प्रधानादीनि कारणांतराण्यनुमिमानास्तत्परतयैव वेदांत
वाक्यानि योजयंति सर्वेष्वेव वेदांतवाक्येषु सृष्टिविषयेष्वनुमानेनैव कार्येण कारणं लिलक्षयिषितं प्रधा
नपुरुषसंयोगाः नित्यानुमेयाः इति सांख्या मन्यंते काणादास्त्वेतेभ्य एव वाक्येभ्य ईश्वरं निमित्तकार
णमनुमिमते अणूंश्च समवायिकारणं एवमन्येपि तार्किकाः वाक्याभासयुक्त्याभासावष्टंभाः पूर्वपक्षवा
दिन इहोत्तिष्ठंति तत्र पदवाक्यप्रमाणज्ञेनाचार्येण वेदांतवाक्यानां ब्रह्मात्मावगतिपरत्वप्रदर्शनाय
वाक्याभासयुक्त्याभासप्रतिपत्तयः पूर्वपक्षीकृत्य निराक्रियंते तत्र सांख्याः प्रधानं त्रिगुणमचेतनं ज
गतः कारणमिति मन्यमानाः आहुः यानि वेदांतवाक्यानि सर्वज्ञस्य सर्वशक्तेर्ब्रह्मणो जगत्कारण
त्वं दर्शयंतीत्यवोचस्तानि प्रधानकारणपक्षेपि योजयितुं शक्यंते सर्वशक्तित्वं तावत्प्रधानस्यापि स्वविका
रविषयमुपपद्यते एवं सर्वज्ञत्वमप्युपपद्यते कथं यत्तु ज्ञानं मन्यसे स सत्वधर्मः सत्वात्संजायते ज्ञान
मिति स्मृतेः तेन च सत्वधर्मेण ज्ञानेन कार्यकरणवंतः पुरुषाः सर्वज्ञा योगिनः प्रसिद्धाः सत्वस्य हि
निरतिशयोत्कर्षे सर्वज्ञत्वं प्रसिद्धं [illegible] कार्यकरणस्य पुरुषस्योपलब्धिमात्रस्य सर्वज्ञत्वं

श्रा॰भा॰ २२ ब्रूमः यत्प्रसादाद्धि योगिनामप्यतीतानागतविषयं प्रत्यक्षं ज्ञानमिच्छन्ति योगशास्त्रविदः किमु वक्तव्यं तस्य नि
त्यसिद्धस्येश्वरस्य सृष्टिस्थितिसंहृतिविषयं नित्यं ज्ञानं भवतीति यदप्युक्तं प्रागुत्पत्तेर्ब्रह्मणः शरीरादिसंबंध
मंतरेणेक्षितृत्वमनुपपन्नमिति न तच्चोद्यमवतरति सवितृप्रकाशवद्ब्रह्मणो ज्ञानस्वरूपनित्य
त्वेन ज्ञानसाधनापेक्षानुपपत्तेः अपि चाविद्यादिमतः संसारिणः शरीराद्यपेक्षा ज्ञानोत्पत्तिः स्यान्न ज्ञान
प्रतिबंधकारणरहितस्येश्वरस्य मंत्रौ चेमावीश्वरस्य शरीराद्यनपेक्षतामनावरणज्ञानतां च दर्शयतः न त
स्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानब
लक्रिया चेति अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमा
10 हुरग्र्यं पुरुषं महांतमिति च ननु नास्ति तव ज्ञानप्रतिबंधकारणवानीश्वरादन्यः संसारी नान्योऽतोऽस्ति द्रष्टा नान्योऽतो
ऽस्ति विज्ञातेति श्रुतेः तत्र किमिदमुच्यते संसारिणः शरीराद्यपेक्षा ज्ञानोत्पत्तिर्नेश्वरस्येति अत्रोच्यते सत्यं ने
श्वरादन्यः संसारी तथापि देहादिसंघातोपाधिसंबंध इष्यत एव घटकरकगिरिगुहाद्युपाधिसंबंध इव व्योम्नः
तत्कृतश्च शब्दप्रत्ययव्यवहारो लोके दृष्टो घटच्छिद्रं करकच्छिद्रमित्यादिराकाशाव्यतिरेकेऽपि तत्कृता
चाकाशे घटाकाशादिभेदमिथ्याबुद्धिः दृष्टा तथेहापि देहादिसंघातोपाधिसंबंधाविवेककृतेश्वरसंसारिभेद
मिथ्याबुद्धिः दृश्यते चात्मन एव सतो देहादिसंघातेऽनात्मन्यात्मत्वाभिनिवेशो मिथ्याबुद्धिमात्रेण सति चैवं उ॰
संसारित्वे देहाद्यपेक्षमीक्षितृत्वमुपपन्नं संसारिणः यदप्युक्तं प्रधानस्यानेकात्मकत्वान्मृदादिवत्कारण। २२
त्वोपपत्तिर्नासंहतस्य ब्रह्मण इति तत्प्रधानस्याशब्दत्वेनैव प्रत्युक्तं यथा तु तर्केणापि ब्रह्मण एव कारण
त्वं निर्वोढुं शक्यते न प्रधानादीनां तथा प्रपंचयिष्यति न विलक्षणत्वादस्येत्येवमादिना ५ अत्राह यत्

णज्ञानेन सर्वज्ञं प्रधानं भविष्यतीति तदपि नोपपद्यते नहि प्रधानावस्थायां गुणसाम्यात्सत्वधर्मो ज्ञानं
संभवति ननूक्तं ज्ञानशक्तिमत्वेन सर्वज्ञं भविष्यतीति तदपि नोपपद्यते यदि गुणसाम्ये सति सत्वव्यपाश्रयां ज्ञान
शक्तिमाश्रित्य सर्वज्ञं प्रधानमुच्येत कामं रजस्तमोव्यपाश्रयामपि ज्ञानप्रतिबंधशक्तिमाश्रित्य किंचिज्ज्ञ
त्वमुच्येत अपि च नासाक्षिका सत्ववृत्तिर्जानातिनाभिधीयते नचाचेतनस्य प्रधानस्य साक्षित्वमस्ति तस्मा
दनुपपन्नं सर्वज्ञत्वं प्रधानस्य योगिनां तु चेतनत्वात्सत्वोत्कर्षनिमित्तं सर्वज्ञत्वमुपपन्नमित्यनुदाहरणं
अथ पुनः साक्षिनिमित्तमीक्षितृत्वं प्रधानस्य कल्प्येत यथाग्निनिमित्तमयःपिंडादेर्दग्धृत्वं तथा सति य
न्निमित्तमीक्षितृत्वं प्रधानस्य तदेव सर्वज्ञं मुख्यं ब्रह्म जगतः कारणमिति युक्तं यत्पुनरुक्तं ब्रह्मणोपि न मुख्यं
सर्वज्ञत्वमुपपद्यते नित्यज्ञानक्रियत्वे ज्ञानक्रियां प्रति स्वातंत्र्यासंभवादिति अत्रोच्यते इदं तावद्भवान्प्रष्टव्यः
कथं नित्यज्ञानक्रियत्वे सर्वज्ञत्वहानिरिति यस्य हि सर्वविषयावभासनक्षमं ज्ञानं नित्यमस्ति सोऽसर्वज्ञ इति
विप्रतिषिद्धं अनित्यत्वे हि ज्ञानस्य कदाचिज्जानाति कदाचिन्न जानातीत्यसर्वज्ञत्वमपि स्यात् नासौ ज्ञाननित्य
त्वे दोषोस्ति ज्ञाननित्यत्वे ज्ञानविषयः स्वातंत्र्यव्यपदेशो नोपपद्यत इति चेन्न प्रततौष्ण्यप्रकाशेपि सवितरि
दहति प्रकाशयतीति स्वातंत्र्यव्यपदेशदर्शनात् ननु सवितुर्दाह्यप्रकाश्यसंयोगे सति दहति प्रकाशयती
ति व्यपदेशः स्यात् न तु ब्रह्मणः प्रागुत्पत्तेर्ज्ञानकर्मसंयोगोस्तीति विषमो दृष्टांतः न असत्यपि कर्मणि सवि
ता प्रकाशत इति कर्तृत्वव्यपदेशदर्शनात् एवमसत्यपि ज्ञानकर्मणि ब्रह्मणस्तदैक्षतेति कर्तृत्वव्यपदे
शोपपत्तेर्न वैषम्यं कर्मापेक्षायां तु ब्रह्मणि ईक्षितृत्वश्रुतयः सुतरामुपपन्नाः किं पुनस्तत्कर्म यत्प्रागुत्प
त्तेरीश्वरज्ञानस्य विषयीभवतीति तत्वान्यत्वाभ्यामनिर्वचनीये नामरूपे अव्याकृते व्याचिकीर्षिते इति

शा॰भा॰ २१

तकेतोरात्मत्वेनोपदिशति अप्तेजसोस्तु विषयत्वादचेतनत्वं नामरूपव्याकरणादौ च प्रयोज्यत्वेनैव निर्दे
शान्न चात्मशब्दवत्किंचिन्मुख्यत्वे कारणमस्तीति युक्तं कूलवद्गौणत्वमीक्षितृत्वस्य तयोरपि सदधि
ष्ठितत्वापेक्षमेवेक्षितृत्वं सतस्त्वात्मशब्दान्न गौणमीक्षितृत्वमित्युक्तं ६ अथोच्यते अचेतनेपि प्रधा
ने भवत्यात्मशब्द आत्मनः सर्वार्थकारित्वात् यथा राज्ञः सर्वार्थकारिणि भृत्ये भवत्यात्मशब्दो ममात्मा
भद्रसेन इति प्रधानं हि पुरुषस्यात्मनो भोगापवर्गौ कुर्वदुपकरोति राज्ञ इव भृत्यः संधिविग्रहादिषु
वर्तमानः अथवा एक एवात्मशब्दश्चेतनाचेतनविषयो भविष्यतीति भूतात्मेंद्रियात्मेति च प्रयोग
दर्शनात् यथैक एव ज्योतिःशब्दः क्रतुज्वलनविषयः तत्र कुत एतदात्मशब्दादीक्षतेर्गौणत्वमित्यत उ
त्तरं पठति तन्निष्ठस्य मोक्षोपदेशात् ७ न प्रधानमचेतनमात्मशब्दालंबनं भवितुमर्हति स आत्मेति प्र
कृतं सदणिमानमादाय तत्त्वमसि श्वेतकेतो इति श्वेतकेतोश्चेतनस्य मोक्षयितव्यस्य तन्निष्ठतामुपदिश्य
चाचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति मोक्षोपदेशात् यदि ह्यचेतनं
सच्छब्दवाच्यं तदसीति ग्राहयेन्मुमुक्षुं चेतनं संतमचेतनोसीति तदा विपरीतवादि शास्त्रं पुरुषस्यानर्थायेत्य
प्रमाणं स्यान्न तु निर्दोषं शास्त्रमप्रमाणं कल्पयितुं युक्तं यदि चाज्ञस्य सतो मुमुक्षोरचेतनमनात्मानमात्म
त्युपदिशेत्प्रमाणभूतं शास्त्रं स श्रद्दधानतयान्धगोलांगूलन्यायेन तदात्मदृष्टिं न परित्यजेत् तद्व्य
तिरिक्तं चात्मानं न प्रतिपद्येत तथा सति पुरुषार्थाद्विहन्येतानर्थं च ऋच्छेत् तस्माद्यथा स्वर्गाद्यर्थिनोग्निहोत्रादिसाध उ॰ २१
नं यथाभूतमुपदिशति तथा मुमुक्षोरपि स आत्मा तत्त्वमसि श्वेतकेतो इति यथाभूतमेवात्मानमुपदिश
तीति युक्तं एवं च सति तप्तपरशुग्रहणमोक्षदृष्टांतेन सत्याभिसंधस्य मोक्षोपदेश उपपद्यते अन्य

इक्तंनाचेतनं प्रधानं जगत्कारणमीक्षितृत्वश्रवणादिति तदन्यथाप्युपपद्यते अचेतनेपि चेतनवदुपचा
रदर्शनात् प्रत्यासन्नपतनतां कूलस्यालक्ष्य कूलं पिपतिषतीति अचेतनेपि कूले चेतनवदुपचारो दृष्टस्त
द्वदचेतनेपि प्रधाने प्रत्यासन्नसर्गे चेतनवदुपचारो भविष्यतीति तदैक्षतेति यथा लोके कश्चिच्चेतनः स्ना
त्वा भुक्त्वा चापराह्णे ग्रामं रथेन गमिष्यामीतीक्षित्वानंतरं तथैव नियमेन प्रवर्त्तते तथा प्रधानमपि मह
दाद्याकारेण नियमेन प्रवर्त्तते तस्माच्चेतनवदुपचर्यते कस्मात्पुनः कारणाद्विहाय मुख्यमीक्षितृत्वमौप
चारिकं कल्प्यते तत्तेज ऐक्षत ता आप ऐक्षंतेति चाचेतनयोरप्तेजसोश्चेतनवदुपचारदर्शनात् तस्मात्सत्क
र्तृकमपीक्षणमौपचारिकमिति गम्यते उपचारप्राये वचनादित्येवं प्राप्त इदं सूत्रमारभ्यते गौणश्चेन्नात्मशब्दा
त् यदुक्तं प्रधानमचेतनं सच्छब्दवाच्यं तस्मिन्नौपचारिकमीक्षितृत्वमप्तेजसोरिवेति तदसत्कस्मादात्मशब्दात्
सदेव सोम्येदमग्र आसीदित्युपक्रम्य तदैक्षत तत्तेजोसृजतेति च तेजोबन्नानां सृष्टिमुक्त्वा तदेव प्रकृतं सदी
क्षितृ तानि च तेजोबन्नानि देवताशब्देन परामृश्याह सेयं देवतैक्षत हंताहमिमास्तिस्रो देवता अनेन जीवे
नात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तत्र यदि प्रधानमचेतनं गुणवृत्त्येक्षितृ कल्प्येत तदेव प्रकृ
तत्वात्सेयं देवतेति परामृश्येत न तदा देवता जीवमात्मत्वेनाभिदध्यात् जीवो हि नाम चेतनः श
रीराध्यक्षः प्राणानां धारयिता तत्प्रसिद्धेर्निर्वचनाच्च स कथमचेतनस्य प्रधानस्यात्मा भवेदात्मा हि नाम
स्वरूपं नाचेतनस्य प्रधानस्य चेतनो जीवः स्वरूपं भवितुमर्हति अथ तु चेतनं ब्रह्म मुख्यमीक्षितृ परिगृह्यते तस्य जी
वविषय आत्मशब्दप्रयोग उपपद्यते तथा स य एषोणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि
श्वेतकेतो इत्यत्र स आत्मेति प्रकृतं सदणिमानमात्मानमात्मशब्देनोपदिश्य तत्त्वमसि श्वेतकेतो इति चेतनस्य श्वे

ब्र॰भा॰ १३

संसेवायं लब्ध्वानंदी भवतीति जीवमानंदमयं लब्धृत्वेन व्यपदिशति नहि लब्धैव लब्धव्यो भवति कथं
तर्ह्यात्माऽन्वेष्टव्यः आत्मलाभान्न परं विद्यत इति च श्रुतिस्मृती यावता न लब्धैव लब्धव्यो भवतीत्युक्तं बा
ढं तथाप्यात्मनोऽप्रच्युतात्मभावस्यैव सतस्तत्त्वानवबोधनिमित्तो देहादिष्वनात्मस्वात्मत्वाभिनिवेशो लौ।
किको दृष्टः तेन देहादिभूतस्यात्मनोऽप्यात्माऽनन्विष्टोऽन्वेष्टव्यः अलब्धो लब्धव्यः अश्रुतः श्रोतव्यः
अमतो मंतव्यो ऽविज्ञातो विज्ञातव्यः इत्यादिभेदव्यपदेश उपपद्यते प्रतिषिध्यत एव परमार्थतः
सर्वज्ञात्परमेश्वरादन्यो द्रष्टा श्रोता वा नान्योऽतोऽस्ति द्रष्टेत्यादिना परमेश्वरस्त्वविद्याकल्पितात्
शारीरात्कर्तुर्भोक्तुर्विज्ञानात्माख्यादन्यः यथा मायाविनश्चर्मखड्गधरात्सूत्रेणाकाशमधिरोहतः
स एव मायावी परमार्थरूपो भूमिष्ठोऽन्यः यथा वा घटाकाशादुपाध्यवच्छिन्नादनुपाधिपरिच्छिन्न आ
काशोऽन्यः ईदृशं च विज्ञानात्मपरमात्मनोर्भेदमाश्रित्य नेतरोऽनुपपत्तेः भेदव्यपदेशाच्चेत्युक्तं १७
कामाच्च नानुमानापेक्षा १८ आनंदमयाधिकारे च सोऽकामयत बहु स्यां प्रजायेयेति कामयितृत्व
निर्देशान्नानुमानिकमपि सांख्यपरिकल्पितमचेतनं प्रधानमानंदमयत्वेन कारणत्वेन वापेक्षित
व्यं ईक्षतेर्नाशब्दमिति निराकृतमपि प्रधानं पूर्वसूत्रोदाहृतां कामयितृत्वश्रुतिमाश्रित्य प्रसंगात्पु
नर्निराक्रियते गतिसामान्यप्रपंचनाय १८ अस्मिन्नस्य च तद्योगं शास्ति १९ इतश्च न प्रधाने जीवे वा
नंदमयशब्दो यस्मादस्मिन्नानंदमये प्रकृते आत्मनि प्रतिबुद्धस्य जीवस्य तद्योगं शास्ति तदात्मना योग
स्तद्योगः तद्भावापत्तिर्मुक्तिरित्यर्थः तद्योगं शास्ति शास्त्रं यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनि
रुक्तेऽनिलयनेऽभयं प्रतिष्ठां विंदते अथ सोऽभयं गतो भवति यदा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते

शं॰ १२

12

6/11

त्वं च ब्रह्मणो मनुष्यत्वादारभ्य उत्तरस्मिन्नुत्तरस्मिन्स्थाने शतगुणत्वमानंदस्योक्त्वा ब्रह्मानंदस्य
निरतिशयत्वावधारणात् तस्मात्प्राचुर्यार्थे मयट् १३ तद्धेतुव्यपदेशाच्च १४ इतश्च प्राचुर्यार्थे मय
ट् यस्मादानंदहेतुत्वं ब्रह्मणो व्यपदिशति श्रुतिः एष ह्येवानंदयातीत्यानंदयतीत्यर्थः यो ह्यन्याना
नंदयति स प्रचुरानंद इति प्रसिद्धं यथा लोके योऽन्येषां धनिकत्वमापादयति स प्रचुरधन इत्युच्य
ते तद्वत् तस्मात्प्राचुर्यार्थेऽपि मयटः संभवादानंदमयः परएवात्मा १४ मांत्रवर्णिकमेव च गीयते
१५ इतश्चानंदमयः परएवात्मा यस्माद्ब्रह्मविदाप्नोति परमित्युपक्रम्य सत्यं ज्ञानमनंतं ब्रह्मेत्यस्मिन्मं
त्रे यद्ब्रह्म सत्यज्ञानानंतविशेषणैर्निर्धारितं यस्मादाकाशादिक्रमेण स्थावरजंगमानि भूतानि सं
जायंते यच्च भूतानि सृष्ट्वा तान्यनुप्रविश्य गुहायामवस्थितं सर्वांतरं यस्य विज्ञानाय अन्योंऽतर आत्मेति
प्रक्रांतं तन्मांत्रवर्णिकमेव ब्रह्मेह गीयते अन्योंऽतर आत्मानंदमय इति मंत्रब्राह्मणयोश्चैकार्थत्वं यु
क्तम् अविरोधात् अन्यथा हि प्रकृतहानाप्रकृतप्रक्रिये स्यातां न चान्नमयादिभ्य इवानंदमयादन्यो
ऽन्तर आत्माभिधीयते एतन्निष्ठैव च सैषा भार्गवी वारुणी विद्या तस्मादानंदमयः परएवात्मा १५ ।
नेतरोऽनुपपत्तेः १६ इतश्चानंदमयः परएवात्मा नेतरः इतर ईश्वरादन्यः संसारी जीव इत्यर्थः
न जीव आनंदमयशब्देनाभिधीयते कस्मादनुपपत्तेः आनंदमयं प्रकृत्य ह्युच्यते सोऽकामयत बहु स्यां
प्रजायेयेति स तपोऽतप्यत स तपस्तप्त्वा इदं सर्वमसृजत् यदिदं किंचेति तत्र प्राक्शरीराद्युत्पत्तेरभि
ध्यानं सृज्यमानानां च विकाराणां स्रष्टुरव्यतिरेकः सर्वविकारसृष्टिश्च न परस्मादात्मनोऽन्यत्रोप
पद्यते १६ भेदव्यपदेशाच्च १७ इतश्चानंदमयः संसारी यस्मादानंदमयाधिकारे रसो वै सः र

ब्र॰ भा॰
२६

तस्मात् प्रियादेरानंदमयविशेषैरानंदस्य मीमांसा भवति एतमानंदमयमात्मानमुपसंक्रामतीति आनंदं ब्रह्म
णो विद्वान् न बिभेति कुतश्चन आनंदो ब्रह्मेति व्यजानादिति च श्रुत्यंतरे च विज्ञानमानंदं ब्रह्मेति ब्रह्मण्येवा
नंदशब्दो दृष्टः एवमानंदशब्दस्य बहुशो ब्रह्मण्येवाभ्यासात् आनंदमय आत्मा ब्रह्मेति गम्यते यत्तूक्तं
अन्नमयाद्यमुख्यात्मप्रवाहपतितत्वादानंदमयस्याप्यमुख्यत्वमिति नासौ दोषः आनंदमयस्य स
र्वांतरत्वात् मुख्यमेवात्मानमुपदिदिक्षु शास्त्रं लोकबुद्धिमनुसरदन्नमयं शारीरमनात्मानमत्यं
तमूढानामात्मत्वेन प्रसिद्धमनूद्य मूषानिषिक्तद्रुतताम्रादिप्रतिमावत्ततोंतरं ततोंतरमित्येवं पूर्वेण
पूर्वेण समानमुत्तरमुत्तरमनात्मानमात्मेति ग्राहयत् प्रतिपत्तिसौकर्यापेक्षया सर्वांतरं मुख्यमानंदम
यमात्मानमुपदिदेशेति श्लिष्टतरं यथारुंधतीनिदर्शने बह्वीष्वपि तारास्वमुख्यास्वरुंधतीषु दर्शिता
सु यांते दर्श्यते सा मुख्यैवारुंधती भवतीत्येवमिहापि आनंदमयस्य सर्वांतरत्वान्मुख्यमात्मत्वं यत्तूक्तं प्रि
यादीनां शिरस्त्वादिकल्पनानुपपन्ना मुख्यस्यात्मन इति अतीतानंतरोपाधिजनिता सा न स्वाभाविकी
त्यदोषः शारीरत्वमप्यानंदमयस्यान्नमयादिशरीरपरंपरया प्रदर्श्यमानत्वात् न पुनः साक्षादेव शा
रीरत्वं संसारिवत् तस्मादानंदमयः पर एवात्मा १२ विकारशब्दान्नेति चेन्न प्राचुर्यात् १३ अत्राह ना
नंदमयः परमात्मा भवितुमर्हति कस्माद्विकारशब्दात् प्रकृतिवचनादयमन्यः शब्दो विकारवचनः
समधिगतः आनंदमय इति मयटो विकारार्थत्वात् तस्मादन्नमयादिशब्दवद्विकारविषय एवानं
दमयशब्द इति चेन्न प्राचुर्यार्थेपि मयटः स्मरणात् तत्प्रकृतवचने मयडिति हि प्रचुरतायामपि हि म
यट् स्मर्यते यथा अन्नमयो यज्ञ इति अन्नप्रचुर उच्यते एवमानंदमयमुच्यते आनंदप्रचुर

13

उ॰
२६

स्मार्यते य: सर्वेश्वरस्तदुपास्त्यत्वायोच्यते एवमिहाप्यादित्यमंडले हिरण्मय: सर्वपाप्मोदयलिं
गात्पर एवेति वक्ष्यति एवमाकाशात्तल्लिंगादित्यादिषु द्रष्टव्यं एवं सद्योमुक्तिकारणमप्यात्मज्ञानमुपा
धिविशेषद्वारेणोपदिश्यमानमप्यविरुद्धं द्वितीयोपाधिविशेषपरावरविषयत्वेन संदिह्यमानं वाक्यगतिप
र्यालोचनया निर्णेतव्यं भवति यथात्रैव तावदानंदमयोभ्यासादिति एवमेकमपि ब्रह्मापेक्षितोपाधि
संबंधं निरस्तोपाधिसंबंधं चोपास्यत्वेन ज्ञेयत्वेन च वेदांतेषूपदिश्यत इति प्रदर्शयितुं परो ग्रंथ आरभ्यते
यच्च गतिसामान्यादिति चेतनकारणत्वनिराकरणमुक्तं तदपि वाक्यांतराणि ब्रह्मविषयाणि व्याचक्षा
णेन विपरीतकारणनिषेधेन प्रपंच्यते १२ आनंदमयोभ्यासात् १२ तैत्तिरीयके ऽन्नमयं प्राणमयं म
नोमयं विज्ञानमयं चानुक्रम्याम्नायते तस्माद्वा एतस्माद्विज्ञानमयादन्योंतर आत्मानंदमय इति तत्र
संशय: किमिहानंदमयशब्देन परमेव ब्रह्मोच्यते यत्प्रकृतं सत्यं ज्ञानमनंतं ब्रह्मेति किं वान्नमयादि
वद्ब्रह्मणोर्थांतरमिति किं तावत्प्राप्तं ब्रह्मणोर्थांतरममुख्य आत्मानंदमय: स्यात्कस्मादन्नमया
द्यमुख्यात्मप्रवाहपतितत्वात् ननु प्रियाद्यसंस्पर्श: स्यात्तु ह तस्य प्रियमेव शिर इत्यादिश्रूयते शारीर
त्वं चाश्रूयते तस्यैष एव शारीर आत्मा य: पूर्वस्येति तस्य पूर्वस्य विज्ञानमयस्यैष एव शारीर आत्मा य एष
आनंदमय इत्यर्थ: न च सशरीरस्य सत: प्रियाप्रियसंस्पर्शो वारयितुं शक्य: तस्मात्संसार्येवानंदमय
आत्मेत्येवं प्राप्त इदमुच्यते आनंदमयोभ्यासात् पर एवात्मानंदमयो भवितुमर्हति कुतोभ्यासा
त् परस्मिन्नेवात्मन्यानंदशब्दो बहुकृत्वोभ्यस्यते आनंदमयं प्रस्तुत्य रसो वै स इति तस्यैव रस
त्वमुक्त्वोच्यते रसं ह्येवायं लब्ध्वानंदी भवति को ह्येवान्यात् क: प्राण्यात् यदेष आकाश आनंदो

शा·भा·
२१

णौ शब्दौ वदितुं आत्मानात्मविवेकिनामपि पंडितानामजाविपालानामिवाविविक्तौ शब्दप्रत्ययौ
भवतः तस्माद्देहादिव्यतिरिक्तात्मास्तित्ववादिनां देहादावहंप्रत्ययो मिथ्यैव न गौणः तस्मान्मिथ्या
प्रत्ययनिमित्तत्वात् सशरीरत्वस्य सिद्धं जीवतोपि विदुषोऽशरीरत्वं तथा च ब्रह्मविद्विषया श्रुतिः तद्य
थाहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेतेथायमशरीरोऽमृतः प्राणो ब्रह्मै
व तेज एवेति सचक्षुरचक्षुरिव सकर्णोकर्ण इव सवागवागिव समना अमना इव सप्राणोऽप्राण इवेति च स्मृ
तिरपि स्थितप्रज्ञस्य का भाषेत्याद्या स्थितप्रज्ञलक्षणान्याचक्षाणा विदुषः सर्वप्रवृत्त्यसंबंधं दर्शयति
तस्मान्नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वं कल्पयितुं शक्यं यस्य तु यथापूर्वं संसारित्वं नासाव
14 वगतब्रह्मात्मभाव इत्यनवद्यं यत्पुनरुक्तं श्रवणात् पराचीनयोर्मनननिदिध्यासनयोर्दर्शनाद्विधि
शेषत्वं ब्रह्मणो न स्वरूपपर्यवसायित्वमिति तन्न श्रवणवदवगत्यर्थत्वान्मनननिदिध्यासनयोः यदि ह्यवगतं ब्र
ह्मान्यत्र विनियुज्येत भवेत्तदा विधिशेषत्वं न तु तदस्ति मनननिदिध्यासनयोरपि श्रवणवदवगत्यर्थत्वा
त् तस्मान्न प्रतिपत्तिविधिविषयतया शास्त्रप्रमाणकत्वं ब्रह्मणः संभवतीति अतः स्वतंत्रमेव ब्रह्म शा
स्त्रप्रमाणकं वेदांतवाक्यसमन्वयादिति सिद्धं एवं च सत्यथातो ब्रह्मजिज्ञासेति शास्त्रारंभ उपपद्यते
प्रतिपत्तिविधिपरत्वे ह्यथातो धर्मजिज्ञासेत्येवारब्धत्वात् न पृथक् शास्त्रमारभेत आरभ्यमाणं चैव ३.
मारभेताथातः परिशिष्टधर्मजिज्ञासेति अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासेतिवत् ब्रह्मात्मैक्या २०
वगतिस्त्वप्रतिज्ञातेति तदर्थो युक्तः शास्त्रारंभोऽथातो ब्रह्मजिज्ञासेति तस्मादहं ब्रह्मास्मीत्येतद
वसाना एव सर्वे विधयः सर्वाणि चेतराणि प्रमाणानि न ह्यहेयानुपादेयाद्वैतात्मावगतौ निर्विषयाण्य

कृतत्वाभिमानहीनस्य तद्वत्कृतत्वाभिमानित्वं मिथ्याज्ञाननिमित्तं भवति तदुक्तं मुक्तमात्रशरीरं वाव संतं न प्रिया
प्रिये स्पृशत इति शरीरे पतिते अशरीरत्वं स्यान्न जीवत इति चेन्न सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात्
न ह्यात्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वान्यतः सशरीरत्वं शक्यं कल्पयितुं नित्य
मशरीरत्वमकर्मनिमित्तत्वादित्यवोचाम तत्कृतधर्माधर्मनिमित्तं सशरीरत्वमिति चेन्न शरीरसंबं
धस्यासिद्धत्वाद्धर्माधर्मयोरात्मकृतत्वासिद्धेः शरीरसंबंधस्य धर्माधर्मयोस्तत्कृतत्वस्य चेतरेतराश्र
यत्वप्रसंगादंधपरंपरैषानादित्वकल्पना क्रियासमवायाभावाच्चात्मनः कर्तृत्वानुपपत्तेः सन्निधि
मात्रेण राजप्रभृतीनां दृष्टं कर्तृत्वमिति चेन्न धनदानाद्युपार्जितभृत्यसंबंधित्वात्तेषां कर्तृत्वोपपत्तेः
न त्वात्मनो धनदानादिवच्छरीरादिभिः स्वस्वामिसंबंधनिमित्तं किंचिच्छक्यं कल्पयितुं मिथ्या
भिमानस्तु प्रत्यक्षः संबंधहेतुः एतेन यजमानत्वमात्मनो व्याख्यातं अत्राहुः देहादिव्यतिरि
क्तस्यात्मनः आत्मीये देहादावभिमानो गौणो न मिथ्येति तन्न प्रसिद्धवस्तुभेदस्य गौणत्वमुख्यत्वप्रसि
द्धेः यस्य हि प्रसिद्धो वस्तुभेदो यथा केसरादिमानाकृतिविशेषोऽन्वयव्यतिरेकाभ्यां सिंहशब्दप्रत्य
यभाङ्मुख्योऽन्यः प्रसिद्धः ततश्चान्यः पुरुषः प्रायिकैः क्रौर्यशौर्यादिभिः सिंहगुणैः संपन्नः
सिद्धस्तस्य पुरुषे सिंह[illegible]गौणौ भवतो नाप्रसिद्धवस्तुभेदस्य तस्य त्वन्यत्रान्यशब्दप्रत्ययौ भ्रां
तिनिमित्तावेव [illegible]कारे स्थाणुरयमित्यगृह्यमाणविशेषे पुरुषशब्दप्र
त्ययौ स्थाणु[illegible]मकस्माद्रजतमिति निश्चितौ शब्दप्रत्ययौ तद्वत्
देहादि[illegible]प्रत्ययावात्मानात्माऽविवेकेनोत्पद्यमानौ कथं गौणौ

सा॰भा॰ २० देहसङ्गतस्येव [illegible] स्य संसारहेतोर्निवृत्तिः प्रयोजनं क्रियत इत्यविशिष्ट
मर्थवत्त्वं क्रियामात्र [illegible] णो न हन्तव्य इति चैवमाद्या निवृत्तिरुपदिश्यते न
च सा क्रिया नापि क्रियासा [illegible] नामुपदेशोऽनर्थकश्चेद्ब्राह्मणो न हन्तव्य इत्यादिनिवृत्त्यु
पदेशानामानर्थक्यं प्राप्तं [illegible] दिष्टं न च स्वभावप्राप्तहन्त्यर्थानुरागेण नञः शक्यमप्राप्तक्रियार्थ
त्वं कल्पयितुं हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण नञश्चैष स्वभावो यत्स्वसंबन्धिनोऽभावं बोध
यति अभावबुद्धिश्चौदासीन्ये कारणं सा च दग्धेन्धनाग्निवत्स्वयमेवोपशाम्यति तस्मात्प्रसक्तक्रिया
निवृत्त्यौदासीन्यमेव ब्राह्मणो न हन्तव्य इत्यादिषु प्रतिषेधार्थं मन्यामहे अन्यत्र प्रजापतिव्रतादिभ्यः
15 तस्मात्पुरुषार्थानुपयोग्युपाख्यानादिभूतार्थवादविषयमानर्थक्याभिधानं द्रष्टव्यं यदप्युक्तं कर्त्त
व्यविध्यनुप्रवेशमन्तरेण वस्तुमात्रमुच्यमानमनर्थकं स्यात् सप्तद्वीपा वसुमतीत्यादिवदिति तत्प
रिहृतं रज्जुरियं नायं सर्प इति वस्तुमात्रकथनेऽपि प्रयोजनस्य दृष्टत्वात् ननु श्रुतब्रह्मणोऽपि यथा
पूर्वं संसारित्वदर्शनान्न रज्जुस्वरूपकथनवदर्थवत्त्वमित्युक्तं अत्रोच्यते नावगतब्रह्मात्मभावस्य
यथापूर्वं संसारित्वं शक्यं दर्शयितुं ब्रह्मात्मभावविरोधात् नहि शरीराद्यात्माभिमानिनो दुःखभ
यादिमत्त्वं दृष्टमिति तस्यैव वेदप्रमाणजनितब्रह्मात्मावगमे तदभिमाननिवृत्तौ तदेव मिथ्याज्ञान उ॰
निमित्तं दुःखभयादिमत्त्वं भवतीति शक्यं कल्पयितुं नहि धनिनो गृहस्थस्य धनाभिमानिनो धना २०
पहारनिमित्तं दुःखं दृष्टमिति तस्यैव प्रव्रजितस्य धनाभिमानरहितस्य तदेव धनापहारनिमित्तं
दुःखं भवति नच कुण्डलिनः कुण्डलित्वाभिमाननिमित्तं सुखं दृष्टमिति तस्यैव कुण्डलवियुक्तस्य

नास्ति नाधिगम्यत इति वक्तुं शक्यं स एष नेति नेत्यात्मेत्यात्मशब्दादात्मनश्च प्रत्याख्यातुमशक्यत्वा
त् य एव निराकर्ता तस्यैवात्मत्वप्रसंगात् नन्वात्माहंप्रत्ययविषयत्वादुपनिषत्स्वेव विज्ञायत इत्य
नुपपन्नं न तत्साक्षित्वेन प्रत्युक्तत्वात् न ह्यहंप्रत्ययविषयकर्तृव्यतिरेकेण तत्साक्षी सर्वभूतस्थः सम
एकः कूटस्थनित्यः पुरुषो विधिकाण्डे तर्कसमये वा केनचिदधिगतः सर्वस्यात्मा अतः स न केनचि
त्प्रत्याख्यातुं शक्यो विधिशेषत्वं वा नेतुं आत्मत्वादेव च सर्वेषां न हेयो नाप्युपादेयः सर्वं हि विनश्यद्वि
कारजातं पुरुषान्तं विनश्यति पुरुषो हि विनाशहेत्वभावादविनाशी विक्रियाहेत्वभावाच्च कूटस्थ
नित्यः अत एव नित्यशुद्धबुद्धमुक्तस्वभावः तस्मात्पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः तं त्वौ
पनिषदं पुरुषं पृच्छामीति चौपनिषदत्वविशेषणं पुरुषस्योपनिषत्स्वेव प्राधान्येन प्रकाश्यमान
त्वादुपपद्यते अतो वस्तुपरो वेदविभागो नास्तीति वचनं साहसमात्रं यदपि शास्त्रतात्पर्यविदा
मनुक्रमणं दृष्टो हि तस्यार्थः कर्मावबोधनमित्येवमादि तद्धर्मजिज्ञासाविषयत्वाद्विधिप्रतिषेधशा
स्त्राभिप्रायं द्रष्टव्यं अपि चाम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामित्येतदेकान्तेनाभ्युपगच्छ
तां भूतोपदेशानामानर्थक्यप्रसंगः प्रवृत्तिनिवृत्तिव्यतिरेकेण भूतं चेद्वस्तूपदिशति भव्यार्थ
त्वेन कूटस्थनित्यं भूतं नोपदिशतीति को हेतुः न हि भूतमुपदिश्यमानं क्रिया भवति अक्रियात्वेपि
भूतस्य क्रियासाधनत्वात्क्रियार्थ एव भूतोपदेश इति चेन्नैष दोषः क्रियार्थत्वेपि क्रियानिर्वर्तन
शक्तिमद्वस्तूपदिष्टमेव [illegible] तदवगमात्) एवं क्रियार्थत्वं तत्प्रयोजनं तस्य न चैता
वता वस्त्वनुपदिष्टं भवति [illegible] किं तव तेन स्यादिति उच्यते अनवगतात्मवस्तूप

शा॰भा॰ ष्टप्रयोजनपरिसमाप्तिर्दृष्टेत्यतश्चशब्दः प्रतिज्ञाविरोधाभ्युच्चयप्रदर्शनार्थः सत्यपि हेयत्ववचने प्रतिज्ञा
२५ विरोधः प्रसज्येत कारणविज्ञानाद्धि सर्वं विज्ञातमिति प्रतिज्ञातमुत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यम
तं मतमविज्ञातं विज्ञातमिति कथं नु भगवः स आदेशो भवतीति यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं वि
ज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमेवं सोम्य स आदेशो भवतीति वाक्योपक्रमे श्र
वणात् न च सच्छब्दवाच्ये प्रधाने भोग्यवर्गकारणे हेयत्वेनाहेयत्वेन वा विज्ञाते भोक्तृवर्गो विज्ञातो भ
वत्यप्रधानविकारत्वात् भोक्तृवर्गस्य तस्मान्न प्रधानं सच्छब्दवाच्यं ८ कुतश्च न सच्छब्दवाच्यं प्रधा
नम् स्वाप्ययात् ९ तदेव सच्छब्दवाच्यं कारणं प्रकृत्य श्रूयते यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य त
16 दा संपन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवतीति एषा श्रुतिः स्वपितीत्ये
तत्पुरुषस्य लोकप्रसिद्धं नाम निर्वक्ति स्वशब्देनेहात्मोच्यते यः प्रकृतः सच्छब्दवाच्यस्तमपीतो भवती
त्यपिगतो भवतीत्यर्थः अपिपूर्वस्यैतेर्लयार्थत्वं प्रसिद्धं प्रभवाप्ययावित्युत्पत्तिप्रलययोः प्रयोगद
र्शनात् मनःप्रचारोपाधिविशेषसंबंधादिंद्रियार्थान् गृह्णंस्तद्विशेषापन्नो जीवो जागर्ति तद्वासना
विशिष्टः स्वप्नान् पश्यन् मनःशब्दवाच्यो भवति स उपाधिद्वयोपरमे सुषुप्तावस्थायामुपाधिकृतवि
शेषाभावात् स्वात्मनि प्रलीन इवेति स्वं ह्यपीतो भवतीत्युच्यते यथा हृदयशब्दनिर्वचनं श्रुत्या दर्शि उ॰
तं स वा एष आत्मा हृदि तस्यैतदेव निरुक्तं हृद्ययमिति तस्माद्धृदयमिति यथा वाशनायोदन्याशब्द २५
प्रवृत्तिमूलं दर्शयति श्रुतिः आप एव तदशितं नयंते तेज एव तत्पीतं नयत इति च एवं स्वमात्मानं सच्छ
ब्दवाच्यमपीतो भवतीतीममर्थं स्वपितिनामनिर्वचनेन दर्शयति न च चेतन आत्माऽचेतनं प्रधा

भासमुक्षे सतदात्मनोपदेशोऽहं ब्रह्मास्मीतिविद्यादितिवत् संपन्मात्रमिदमनित्यफलंस्यात् न
त्रमोक्षोपदेशोनोपपद्येत तस्मान्नसदवाच्यमात्मशब्दस्यगौणत्वंभृत्ये तु स्वामिभृत्यभेदस्यप्रत्यक्षत्वादुपप
न्नोगौणआत्मशब्दोममात्माभद्रसेनइति अपिचक्वचिद्गौणःशब्दोदृष्टइतिनैतावताशब्दप्रमाणकेर्थेगौणी
कल्पनान्याय्यासर्वत्रानाश्वासप्रसंगात् यत्तूक्तंचेतनाचेतनयोःसाधारणआत्मशब्दःक्रतुज्वलनयो ।
रिवज्योतिःशब्दइति अत्रअनेकार्थत्वस्यान्याय्यत्वात्तस्माच्चेतनविषयएवमुख्यआत्मशब्दश्चेतनत्वो
पचाराद्भूतादिषुचप्रयुज्यतेभूतात्मेंद्रियात्मेतिचसाधारणत्वेप्यात्मशब्दस्यप्रकरणमुपपदंवाकिंचि
न्निश्चायकमन्तरेणान्यतरवृत्तितानिर्धारयितुंशक्यते नचाचेतनस्यनिश्चायकंकिंचित्कारणमस्ति
प्रकृतंतुसदीक्षितृसंनिहितश्चेतनःश्वेतकेतुः नहिचेतनस्यश्वेतकेतोरचेतनआत्मासंभवतीत्यवोचाम
तस्माच्चेतनविषयइहात्मशब्दइतिनिश्चीयतेज्योतिःशब्दोपिलौकिकेनप्रयोगेणज्वलनएवरूढोर्थ
वादप्रकल्पितेनतुज्वलनसादृश्येनक्रतौप्रवर्त्ततइत्यदृष्टान्तः अथवापूर्वसूत्रएवात्मशब्दंनिर
स्तसमस्तगौणसाधारणत्वाशंकतयाव्याख्याय ततःस्वतन्त्रएवप्रधानकारणनिराकरणेहेतुर्व्या ।
ख्येयः तन्निष्ठस्यमोक्षोपदेशादितितस्मान्नाचेतनंप्रधानंसच्छब्दवाच्यम् ७ कुतश्चनप्रधानंसच्छ
ब्दवाच्यं हेयत्वावचनाच्च ८ यद्यनात्मैवप्रधानंसच्छब्दवाच्यंसआत्मातत्त्वमसीतीहोपदिष्टंस्यात्
सतदुपदेशश्रवणादनात्मज्ञतयातन्निष्ठोमाभूदितिमुख्यमात्मानमुपदिदिक्षुस्तस्यहेयत्वंब्रूयात्
यथारुन्धतींदिदर्शयिषुस्तत्समीपस्थांस्थूलांतारांप्रथमममूमरुंधतीतिग्राहयित्वातांप्रत्याख्याय
पश्चादरुंधतीमेवग्राहयतितद्वन्नायमात्मेतिब्रूयात् नचैवमवोचत् सन्मात्रात्मावगतिनिष्ठैवष ।

छा॰ भा॰ कंप्रतिपादितंगतिसामान्योपन्यासेनतत्त्वस्यसर्वैर्वेदान्तैश्चेतनकारणवादिन इति विद्यात्। अतः परस्य
२५ स्यकिंमुख्यानमिति उच्यते द्विरूपं हि ब्रह्माम्नायते नामरूपविकारभेदोपाधिविशिष्टं तद्विपरीतं च
सर्वोपाधिविवर्जितं यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं
पश्येत् यत्र नान्यत् शृणोति नान्यद्विजानाति स भूमा अथ यत्रान्यत्पश्यति अन्यच्छृणोति अन्यद्विजाना
ति तदल्पं यो वै भूमा तदमृतं अथ यदल्पं तन्मर्त्यं सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्
यदास्ते निष्कलं निष्क्रियं शान्तं निरवद्यं निरंजनं अमृतस्य परं सेतुं दग्धेन्धनमिवानलं नेति नेतीत्य।
स्थूलमनण्वह्रस्वमदीर्घमिति न्यूनमन्यत्स्थानं संपूर्णमन्यदिति चैवं सहस्रशो विद्याविद्याविषयभे
17 देन ब्रह्मणो द्विरूपतां दर्शयंति वाक्यानि तत्राविद्यावस्थायां ब्रह्मण उपास्योपासकादिलक्षणः सर्वो
व्यवहारः तत्र कानिचिद्ब्रह्मण उपासनान्यभ्युदयार्थानि कानिचित्क्रममुक्त्यर्थानि कानिचित्कर्मस
मृद्ध्यर्थानि तेषां गुणविशेषोपाधिभेदेन भेदः एक एव तु परमात्मेश्वरस्तैस्तैर्गुणविशेषैर्विशिष्ट उ
पास्यो यद्यपि भवति तथापि यथागुणोपासनमेव फलानि भिद्यन्ते तं यथा यथोपासते तदेव भवती
ति श्रुतेः यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवतीति च श्रुतिः यं यं वापि स्मरन्भा
वं त्यजत्यंते कलेवरं तं तमेवैति कौन्तेय सदा तद्भावभावित इति यद्यप्येक आत्मा सर्वभूतेषु स्थाव उ॰
जंगमेषु गूढः तथापि चित्तोपाधिविशेषतारतम्यादात्मनः कूटस्थनित्यस्यैकरूपस्याप्युत्तरोत्त २५
रमाविष्कृतस्य तारतम्यमैश्वर्यशक्तिविशेषैः श्रूयते तस्य य आत्मानमाविस्तरां वेदेत्यत्र स्मृतावपि य
यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा तत्तदेवावगच्छ त्वं मम तेजोंशसंभवमिति यत्र यत्र विभू

नैवरूपत्वेन प्रतिपद्यते यदि प्रधानमेवात्मीयत्वात् स्वशब्देनोच्येत एवमपि चेतनोऽचेतनमप्येतीति ।
विरुद्धमापद्येत श्रुत्यंतरं च प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नांतरमिति सुषुप्तमवस्थापा
चेतने प्ययं दर्शयति अतो यस्मिन्नप्ययः सर्वेषां चेतनानां तच्चेतनं सच्छब्दवाच्यं जगतः कारणं न प्रधानं
९ कुतश्च न प्रधानं जगतः कारणं गतिसामान्यात् १० यदि तार्किकसमयवत् वेदांतेष्वपि भिन्ना ।
कारणगतिरभविष्यत् (तत्तेतदलिसमानेव हि) क्वचिच्चेतनं ब्रह्म जगतः कारणं क्वचिदचेतनं प्रधा ।
नं क्वचिदन्यदेवेति ततः कदाचित् प्रधानकारणवादानुरोधेनापीक्षत्यादिश्रवणमकल्पयिष्यत् न त्वे
तदस्ति समानेव हि सर्वेषु वेदांतेषु चेतनकारणगतिः यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिंगा विप्र
तिष्ठेरन् एवमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठंते प्राणेभ्यो देवा देवेभ्यो लोका इति त
स्माद्वा एतस्मादात्मनः आकाशः संभूत इति आत्मत एवेदं सर्वमिति आत्मत एष प्राणो जायत इति
आत्मनः कारणत्वं दर्शयंति सर्वे वेदांताः आत्मशब्दश्च चेतनवचनः इत्यवोचाम महच्च प्रामाण्यकारणमे
तद्यद्वेदांतवाक्यानां चेतनकारणत्वे समानगतित्वं चक्षुरादीनामिव रूपादिषु अतो गतिसामान्यात् सर्व
ज्ञं ब्रह्म जगतः कारणं १० कुतश्च सर्वज्ञं ब्रह्म जगतः कारणं श्रुतत्वाच्च ११ स्वशब्देनैव सर्वज्ञ ईश्व
रो जगतः कारणमिति श्रूयते श्वेताश्वतराणां मंत्रोपनिषदि सर्वज्ञमीश्वरं प्रकृत्य स कारणं करणाधिपा
धिपो न चास्य कश्चिज्जनिता न चाधिप इति तस्मात् सर्वज्ञं ब्रह्म जगतः कारणं (करणाधिपा) नाचेतनं प्रधा
नमन्यद्वेति सिद्धं ११ जन्माद्यस्य यत इत्यारभ्य श्रुतत्वाच्चेत्येवमंतैः सूत्रैर्यान्युदाहृतानि वेदांतवाक्यानि ते
षां सर्वज्ञः सर्वशक्तिरीश्वरो जगतो जन्मस्थितिलयकारणमित्येतस्यार्थस्य प्रतिपादकत्वं न्यायपूर्व

ब्र॰ भा॰
४

नापि पुरुषतन्त्रता किं तर्हि प्रमाणजन्यविषयवस्तुतन्त्रैवेति ज्ञानमेव तन्न क्रिया। एवं सर्वप्रमाणविषयव।
स्तुष्वपि वेदितव्यं तत्रैवं सति यथाभूतब्रह्मात्मविषयमपि ज्ञानं न चोदनातन्त्रं तद्विषया लिङा
द्यः श्रूयमाणा अप्यनियोज्यविषयत्वात् कुण्ठीभवन्त्युपलादिषु प्रयुक्तक्षुरतैक्ष्ण्यादिवत् अहे
यानुपादेयवस्तुविषयत्वात् किमर्थानि तर्ह्यात्मा वा अरे द्रष्टव्य इत्यादीनि विधिच्छायानि वचना
नि स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानीति ब्रूमः यो हि बहिर्मुखः प्रवर्तते पुरुष इष्टं मे
भूयात् अनिष्टं मा भूदिति न च तत्रात्यन्तिकं पुरुषार्थं लभते तमात्यन्तिकपुरुषार्थवाञ्छिनं स्वाभा
विकात्कार्यकारणसंघातप्रवृत्तिगोचराद्विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्त्यात्मा
18 वा अरे द्रष्टव्य इत्यादीनि तस्यात्मान्वेषणाय प्रवृत्तस्याहेयमनुपादेयं चात्मतत्त्वमुपदिश्यते इदं
सर्वं यदयमात्मा यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्केन कं विजानीयात् विज्ञातारमरे
केन विजानीयादयमात्मा ब्रह्मेत्यादिभिः यदप्यकर्तव्यप्रधानमात्मज्ञानं हानायोपादानाय वा न भ
वतीति तत्तथैवेत्यभ्युपगम्यते अलंकारो ह्ययमस्माकं यद्ब्रह्मावगतौ सत्यां सर्वकर्तव्यताहानिः कृ
तकृत्यता चेति तथा च श्रुतिः आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन्कस्य कामाय श ४
रीरमनुसंज्वरेदिति एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारतेति च स्मृतिः तस्मान्न प्रतिपत्तिवि
धिविषयतया ब्रह्मणः समर्पणं यदपि केचिदाहुः प्रवृत्तिनिवृत्तिविधितच्छेषव्यतिरेकेण
केवलवस्तुवादी वेदभागो नास्तीति तन्न औपनिषदस्य पुरुषस्यानन्यशेषत्वात् यो ऽसावुपनिषत्स्वे
वाधिगतः पुरुषोऽसंसारी ब्रह्मोत्पाद्यादिचतुर्विधद्रव्यविलक्षणः स्वप्रकरणस्थोऽनन्यशेषो नासौ

एवंकश्चिद्विषयात्मत्वेनपरिगृहीतः संक्रियतइतिप्रकृतं यथादेहाद्युपचितिक्रियानिमित्तेनप्रधानसाम्ये
नतसंहतस्यतदभिमानिनआत्मनोपकारफलमदृष्टंसंयोगइति यच्चबुद्धिकल्प्यतेसंक्रियते एवंस्नानाचमन
यज्ञोपवीतादिनाहस्ताद्यःसंस्कारःइतियच्चबुद्धिकल्प्यतेसंक्रियते यच्चदेहेनसंहतएवतेनैवसहंक
र्त्ताऽहंममयविषयेणअमपिनासर्वाःक्रियानिर्वर्त्तंते तस्मात्वंचमएवास्नातितयोन्यःपिप्पलंस्वाद्वत्त्य
नश्नन्नन्योभिचाकशीतिमंत्रवर्णाःशात्मेंद्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिणइतिच तथाचएकोदेवः
सर्वभूतेषुगूढःसर्वव्यापीसर्वभूतांतरात्मा कर्माध्यक्षःसर्वभूताधिवासःसाक्षीचेताकेवलोनिर्गुणश्चे
तिसपर्यगाच्छुक्रमकायमव्रणमस्नाविरंशुद्धमपापविद्धमिति चैतौमंत्रावनाधेयातिशयतांनित्यशु
द्धतांचब्रह्मणोदर्शयतःब्रह्मभावश्चमोक्षः अतोऽन्यमोक्षंप्रतिक्रियानुप्रवेशद्वारंनशक्यंकेनचिद्द
र्शयितुं तस्माज्ज्ञानमेकंमुक्त्वाक्रियायागंधमात्रस्याप्यनुप्रवेशइहनोपपद्यते ननुज्ञानंनाममानसी
क्रियानवैलक्षण्यात् क्रियाहिनामसायत्रवस्तुस्वरूपनिरपेक्षैवचोद्यतेपुरुषचित्तव्यापाराधी
नाच यथायस्यैदेवतायैहविर्गृहीतंस्यात्तांध्यायेद्वषट्करिष्यन्नितिसंध्यांमनसाध्यायेदितिचै
वमादिषुध्यानंचिंतनंयद्यपिमानसंतथापिपुरुषेणकर्तुमकर्तुमन्यथावाकर्तुंशक्यंपुरुषव्या
पारतंत्रत्वात् ज्ञानंतुप्रमाणजन्यंप्रमाणंचयथाभूतवस्तुविषयमतोज्ञानंकर्तुमकर्तुमन्यथावा
कर्तुमशक्यंकेवलंवस्तुतंत्रमेवतत् नचोदनातंत्रंनापिपुरुषतंत्रंतस्मान्मानसत्वेपिज्ञानस्यमहद्वै
लक्षण्यं यथापुरुषोवावगौतमाग्निःयोषावावगौतमाग्निरितिअत्रयोषित्पुरुषयोरग्निबुद्धिर्मानसीभ
वतिकेवलचोदनाजन्यत्वात्क्रियैवसापुरुषतंत्राच यातुप्रसिद्धेऽग्नावग्निबुद्धिर्नसाचोदनातंत्रा

शाखांतर्गततेसतिवेदत्वेनाप्रसिद्धेषु ८

संबंधादुपास्यैक्येन रूपाभेदात्संयोगाद्यभेदाच्च विद्यैक्यादनियम इति प्राप्ते तदिदमुक्तं संबंधादेवमन्यत्रापि यथाम
नोमयत्वादिगुणविशिष्टस्यैक्यादुपास्यैक्येन विद्यैक्यादनुलोपसंहार एवमन्यत्राप्यस्यादित्यसंबंधिनो ब्रह्मणः स
सत्यस्यैकत्वेन विद्यैक्यादुभयोरुभयत्रोपसंहार इत्येवं प्राप्ते प्रचक्ष्महे ॥ न वा विशेषात् ॥ नचैतदस्ति यद्विद्यै
क्यादुपसंहार इति कुतः विशेषात् उपास्यरूपविशेषात् ब्रह्मण एकत्वेपि एकत्रादित्यमंडलस्यत्वयोपास्य
19 मितरत्राक्ष्याधारत्वयोपास्यत्वमिति स्थानसंबंधित्वभेदेन रूपभेदाद्विद्याभेदः नैवं शांडिल्यविद्याया उपास्य
ने [illegible] ते उभयत्र ह्रदयाधारत्वेनोपास्यत्वात् अतो व्यवस्थितिरिति ॥ दर्शयति च ॥ दर्शयति चाक्ष्याधारादित्याधा
रयोर्गुणानुपसंहारं तस्यैतदेव रूपं यदमुष्य रूपमित्यादिना रूपातिदेशेन स्वतो ह्यप्राप्तावतिदेशो [illegible] पेक्षा
अन्नमयप्रभृति प्रथमेति वा ॥ संभृति द्युव्याप्त्यपि चातः ॥ तैत्तिरीयके राणायनीयानां खिलेषु ब्रह्मज्येष्ठा वीर्या संभृतानि ब्रह्माग्रेज्ये
ष्ठं दिवमाततानेति ब्रह्मभूतानां प्रथमोत जज्ञे तेनार्हति ब्रह्मणा स्पर्धितुं कहति ब्रह्मणो ज्येष्ठानां वीर्याणां संभृति
द्युव्याप्तिकृत्स्नादिगुणजातमाम्नातं तेषामुपासनविशेषमनारभ्याधीतानां गुणानां सर्वासु विद्यासूपसंहारे
प्राप्ते उच्यते संभृतिद्युव्याप्त्यपीति संभृतिव्याप्त्यपीति समाहारद्वंद्वत्वादेकवद्भावः संभृत्यादिकमनारभ्याधीतम
पि अत एव स्थानभेदाद्व्यवस्थानं न सर्वत्रोपसंहर्तव्यं कथमनारभ्याधीतानां स्थानविशेषनियतत्वं समाम
नादिति ब्रूमः द्युव्याप्तिरित्यादिवद्याप्रसक्तावनन्यगोचरासु विद्यासु नोपसंहर्तुं शक्याः संभृत्यादयोपि तत्त
द्विषयाः ऽस्तुलदेशाऽल्पस्थानविषयासु विद्यास्वनुपसंहार्याः शांडिल्यदहरादिविद्यास्वल्पस्थानविषया
स्वल्पायाः स्वविद्याः यावान्वायमाकाश इत्यनेनैव ताहृदय आकाश इत्यादयस्तत्र तत्राशक्योपसंहाराः

त्ययश्रवणादेतदेवतदन्नमनग्नं कुरुते इति वेदने विधिप्रत्ययाभावादनग्नतासंकीर्तनस्य तु स्तुत्यर्थतयान्यथोपपत्तेश्च भोजनांगस्याचमनस्य
स्मृत्याचारप्राप्तत्वेन विधिप्रत्ययवत्वात् प्राणविद्यांगमाचमनांतरं विधीयत इति प्राप्ते ब्रूमः आचमनीयानामपां प्राणस्य वासस्त्वा
नुसंधानमेवेदं पूर्वमप्राप्तं विधीयते कुतः कार्याख्यानात् अप्राप्ताख्यानाद्धि प्राप्ताख्याने शास्त्रस्यार्थवत्वादित्यर्थः एतदुक्तं भवति
किं मे वासः आपो वासः अद्भिः परिदधति एतदेव तदन्नमनग्नं कुरुतेत्र सुपक्रमोपसंहारयोर्वीक्षणात् प्राणवासस्त्वदृष्टिपरत्वमनी
ते आचमनस्य स्मृत्याचारप्राप्तत्वादाचमनमनूद्याचमनीयास्वप्सु प्राणवासस्त्वानुसंधानं विधीयते इति अत एव छांदोग्ये
तस्माद्वा एतदशिष्यंतः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधतीत्यद्भिः परिधानमेवोक्तं नाचमनम् ० समान एवं चाभेदात् ० वाज
सनेयके अग्निरहस्ये शांडिल्यविद्याम्नाता स सत्यं ब्रह्मेत्युपासीताथ खलु क्रतुमयोऽयं पुरुष इत्यारभ्य स आत्मानमुपासीत मनो
मयं प्राणशरीरं भारूपं सत्यसंकल्पमाकाशात्मानमिति तथा तस्मिन्नेव बृहदारण्यके पुनरपि शांडिल्यविद्याम्नायते मनोम
योऽयं पुरुषो भाःसत्यस्तस्मिन्नंतर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशा
स्ति यदिदं किंचेति तत्र संशयः किमत्र विद्याभिद्यते उत नेति संयोगचोदनाख्याविशेषेऽपि वशित्वाद्युपास्यगुणभेदेन रूपभेदा
त् विद्याभेद इति प्राप्ते उच्यते समान एवमिति यथाग्निरहस्ये मनोमयप्राणशरीरभारूपसत्यसंकल्पत्वादिगुणगणः श्रुत
एवं बृहदारण्यकेऽपि मनोमयत्वादिके समाने सत्याधिकस्य वशित्वादेश्च सत्यसंकल्पत्वगुणादभेदान्न रूपभेदः अतो विद्यैक्यं
० संबंधादेवमन्यत्रापि ० बृहदारण्यके श्रूयते सत्यं ब्रह्मेत्युपक्रम्य तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मंडले पुरुषो यश्चा
यं दक्षिणेक्षिन्पुरुष इत्युपक्रम्याधिदैवमध्यात्मं च सत्यस्य ब्रह्मणो व्याहृतिशरीरत्वेनोपास्यत्वमुक्त्वा तस्योपनिषदहरि
त्यधिदैवतं तस्योपनिषदहमित्यध्यात्ममिति द्वे उपनिषदौ रहस्यनामनी उपास्ये तत्राम्नायेते ते किं यथा शक्तं स्यान्न वि
भागनियतत्वेन व्यवस्थिते उतोभयत्रोभे अनियमेनेति संशये सत्यस्य व्याहृतिशरीरस्योपास्यस्यैकत्वादुभयोः स्थानयोः

प्रा० भा० ८८

20

ऽस्मद्युद्वेत्यामनेति कठाः तैत्तिरीयाश्च शन्नो मित्रः शं वरुण इत्यादिकं छान्दोग्या आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणीत्यादि
कं ऐतरेयिणस्तु महाव्रतब्राह्मणमधीयते इन्द्रो वै वृत्रं हत्वा महानभवदित्यादि कौषीतकिनोऽपि महाव्रतब्राह्मणमेव
प्रजापतिर्वै संवत्सरस्तस्यैष आत्मा यन्महाव्रतमिति वाजसनेयिनस्तु प्रवर्ग्यब्राह्मणं देवा ह वै सत्रं निषेदुरित्यादि तत्रैवं
प्राप्ते किमुपनिषदारम्भे पठिताः शुक्रं प्रविध्येत्यादयो मन्त्राः प्रवर्ग्यादीनि च कर्माणि विद्याङ्गमुत नेति किं युक्तं
विद्याङ्गमिति कुतः संनिधिसमाम्नानात् विद्याङ्गत्वप्रतीतेः यद्यपि शुक्रं प्रविध्येत्यादीनां मन्त्राणां प्रवर्ग्यादेश्च कर्मणः श्रु-
तिलिङ्गवाक्यैर्बलवद्भिर्यथायथं कर्मसु विनियोगोऽवगम्यते तथापि शं नो मित्रः सह नाववतु इत्यादेर्मन्त्रस्य तत्र विनि-
योगाभावाद्विद्याधिकाराच्च विद्याङ्गत्वमवर्जनीयमिति सर्वासु विद्यासु ते मन्त्रा उपसंहर्तव्या इति प्राप्ते प्रत्युच्यते वेधा-
द्यर्थभेदात् शुक्रं प्रविध्य हृदयं प्रविध्य ऋतं वदिष्यामि सत्यं वदिष्यामि ऋतमवादिषं सत्यमवादिषं तेजस्विनाव-
धीतमस्तु मा विद्विषावहै इत्यादिभिर्लिङ्गैरभिचाराध्ययनादिष्वेवास्य विनियोगावगमान्न विद्याङ्गत्वम्।
एतदुक्तं भवति यथा वै हृदयं प्रविध्येत्यादिमन्त्रे सामर्थ्याच्छुक्रं प्रविध्येत्यादीनामभिचारशेषत्वमवगम्यते एवमे-
व ऋतं वदिष्यामीत्यधीतमित्यादिमन्त्रे सामर्थ्यादेव स्वाध्यायशेषत्वं शन्नो मित्र इत्यादिमन्त्राणामवगम्यते एतेनान्ये-
षां विद्याङ्गत्वमिति शुक्रं प्रविध्येत्यादीनां प्रवर्ग्यादीनां चान्येषामर्थपाठादिगाकीर्त्यत्वात् एवं तथा कार्यलक्षणः हानौ तू- सा०
पायनशब्दशेषत्वात्कुशाच्छन्दस्तुत्युपगानवत्तदुक्तं छन्दोगा आमनन्ति अश्व इव रोमाणि विधूय पापं चन्द्र इव राहो-
र्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवानीति आथर्वणिकाश्च तथा विद्वान् पुण्यपापे विधूय नि-
रञ्जनः परमं साम्यमुपैतीति शाट्यायनिनस्तु तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यामित्यादि कौषि-
तकिनस्तु तत्सुकृतदुष्कृते धुनुते तस्य प्रिया ज्ञातयः सुकृतमुपयन्ति अप्रिया दुष्कृतमिति एवं क्वचित्सुकृतदुष्कृतयोर्हानिः क्वचि-

मनोमयत्वापहतपाप्मत्वादिविशिष्टस्योपास्यस्य माहात्म्यप्रतिपादनपराः श्रीपुरुषविद्यायामपि चेतरेषामनाम्ना
नात् श्रीतैत्तिरीयके पुरुषविद्याम्नायते तस्यैवंविदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लो
दिका छांदोग्ये पुरुषविद्याम्नायते पुरुषो वाव यज्ञस्तस्य यानि चतुर्विंशतिवर्षाणीत्यादिका तत्र संशयः किमत्र विद्या
भिद्यते उत नेति पुरुषविद्येति नामैक्यात् पुरुषावयवे यज्ञावयवकल्पनासाम्याच्चैक्यात् तैत्तिरीयके फलसंयोगाश्र
वणात् छांदोग्ये प्रावर्षशतं जीवतीति छांदोग्ये श्रुतस्यैव पुरुषविद्याफलत्वात् फलसंयोगस्याप्यविशेषाद्विद्यैक्य
मिति प्राप्त उच्यते उभयत्राम्नायमानयोर्विद्ययोः पुरुषविद्यात्वेपि विद्याभेदोस्त्येव कुतः इतरेषामनाम्नानात्
एकस्यां शाखायामाम्नातानां गुणानामन्यत्रानाम्नानात् यथा हि यस्यां प्रातर्मध्यंदिनं च तानि सवनानि लीस्या
यस्तैत्तिरीयके आम्नाताः छांदोग्ये सवनत्वेन नाम्नायंते त्रेधा विभक्ते पुरुषायुषे छांदोग्ये सवनत्वेन कल्प्यंते छां
दोग्ये अशनापिपासादीनां दीक्षादित्वकल्पनं तैत्तिरीयके न कृतं यजमानपत्न्यादिपरिकल्पनं चान्यथाम्नातोत्प
मुभयत्र भिद्यते तथा फलसंयोगोपि भिद्यते तैत्तिरीयके हि पूर्ववाक्ये सत्त्वे त्वा महस ओमित्यात्मानं युंजीतेति ब्रह्म
विद्यामभिधाय तत्फलत्वेन ब्रह्मणो महिमानमाप्नोतीत्युक्तात् तस्यैवं विदुष इत्यादिनाम्नाता पुरुषविद्या तस्यैव
ब्रह्मविदुषो यज्ञत्वकल्पनमिति गम्यते अतो ब्रह्मविद्यांगत्वात् ब्रह्मप्राप्तिरेवात्र फलं फलवत्सन्निधावफलं तदंगमिति
च न्यायात् तैत्तिरीयकाम्नाता पुरुषविद्या ब्रह्मविद्यांगमिति गम्यते छांदोग्ये त्वायुःप्राप्तिफला पुरुषविद्येत्युक्तं अतो
रूपसंयोगयोर्भेदाद्विद्याभेदः एवं शाखांतराम्नातानां गुणानामितरत्रानुपसंहारः श्रीवेदव्यासपर्यायभेदात्० आथर्वणिका
उपनिषदारंभे शुक्रं प्रविध्य हृदयं प्रविध्येत्यादिमंत्रानधीयते सामगाश्च देव सवितः प्रसुवेय

गच्छद्विरजयोर्द्वयोर्विकल्पः समामनितव्यः स च संभवत्यंगतो न युज्यते तदुक्तं पूर्वस्मिन्काण्डे अपि तु वाक्यशेषत्वादन्याप्युला
द्विकल्पस्य विधीनामेकदेशत्वादिति न देवं केवलहानोपायनवाक्ययोरेकवाक्यत्वात् केवलस्य हानस्य केवलस्योपा
यनस्यासंभवाद्विकल्पो नोपपद्यते कौषीतकिनामुभयमाम्नानमविशेषेण तः श्रवणत्वेन प्रतिपन्नभेदाद्विस्कंध आंश
परायेतर्तव्याभावात्तथा ह्यन्ये सुकृतदुष्कृतयोर्हानमुपायनं च वस्वसु विद्यासु चिंतनीयमिति सुक्तं तद्धानं किं देहवियोग
काले देहादुत्क्रान्तस्याध्वनि च उत देहवियोगकाल एवेति विशये उभयत्रेति युक्तं उभयपाठश्रुतत्वात् एवं हि कौ

षीतकिनः समामनंति स एतं देवयानं पंथानमापद्याग्निलोकं गच्छतीत्युपक्रम्य स आगच्छति विरजां नदीं ताम
नसात्येति तत्सुकृतदुष्कृते धुनते इति अत्र वाक्ये अध्वनि सुकृतदुःकृतहानं प्रतीयते तांड्डिनस्तु अश्व इव रोमाणि
विधूय पापं चंद्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवानीत्यत्र तु देहवियोगका
ल एवेति प्रतीयते शाट्यायनकेपि तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्विषंतः पापकृत्यामिति पुत्रेषु दायसंक्रां
तिसमकाले सुकृतदुःकृतसंक्रमणं श्रूयमाणं देहवियोगकालमिति गम्यते अतः सुकृतदुष्कृतयोरेकदेशो देहवि
योगकाले हीयते शेषं त्वध्वनीति प्राप्त उच्यते सांपराय इति सांपराये देहापक्रमणकाल एव विदुषः सुकृतदुःकृते नि
रवशेषे हीयेते कुतः तर्तव्याभावात् विदुषो देहवियोगात्पश्चात्सुकृतदुष्कृताभ्यां तरितव्यमभोगाभावाद्विद्याफलम्भू
तब्रह्मप्राप्तिव्यतिरेकेण हि सुकृतदुष्कृताभ्यां भोक्तव्यौ सुखदुःखे न विद्येते तथा ह्यन्ये देहवियोगादूर्ध्वं ब्रह्मप्राप्तिव्यति
रिक्तसुखदुःखोपभोगाभावमधीयते अशरीरं वाव संतं न प्रियाप्रिये स्पृशत एष संप्रसादोस्माच्छरीरात्समुत्थाय परं ज्यो
तिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति च श्री छंदत उभयाविरोधात्
एवमर्थं तर्तव्याभावात्सुकृतदुष्कृतहानिकाले व्यवस्थिते सत्युभयाविरोधेन स्वकीयेर्थे स्वभावस्याविरोधेन छंदतो यथेष्ट

सामर्थ्यात्समुच्चये हि सर्वदोभयानुसंधानं स्यात्तत्र कौषीतकिवाक्ये नैव सिद्धमित्यन्यत्राम्नान तृ॰: ६

त्प्रियाप्रियेषु तत्प्राप्तिः कचिदुभयं चाम्नातं तदुभयमेकैकविद्यायां आम्नातमपि सर्वविद्यांगमाक्षेपं सर्वब्रह्मविद्यानिष्ठस्या
पि ब्रह्म प्राप्नुवतः पुण्यपापप्रहाणस्यावश्यंभावित्वात् प्रहाणविषयत्वाच्चोपायनस्य तच्चिंतनं च विधीयमानं सर्व
विद्यांगं भवितुमर्हति तत्र दैवविद्यायोर्हानिचिंतनमुपायनचिंतनमुभयचिंतनं च विकल्प्येरन् उपसंह्रियेरन्वा
किमुक्तं विकल्प्येरन्निति कुतः पृथगाम्नानेनानर्थकमेव स्यात् अतोऽनेकत्राम्नानस्य विकल्प एव प्रयोजनं न चाभे
द्भेदेन परिहर्तुं शक्यं अनेकत्राम्नानमविशेषेण पुनः अत्र तत्रैव भेदपरिहार्यं अत्र तु हानिरेव द्वयोः शाख
योरुपायनमेव चैकस्यां न च विद्याभेदेन व्यवस्थापयितुं शक्यं सर्वदोषप्रहाणमिदमनुसंधानमित्युक्तत्वात् अत्रेदमु
च्यते हानौ तूपायनशब्दशेषत्वादिति तुशब्दः पक्षव्यावर्त्तनार्थः यत्र हानावितिप्रदर्शनार्थं केवलायां हानौ केवले चोपा
यने श्रूयमाणे तयोरितरेतरसमुच्चयो यथापूर्वभावी कुतः उपायनशब्दशेषत्वात् उपायशब्दस्य हानिवाक्य
शेषत्वात् उपायनवाक्यस्य हि हानिवाक्यशेषत्वमेवोचितं विदुषा त्यक्तयोः पुण्यपापयोः प्रदेशस्यानन्वयाच्चित्ता
दुपायनवाक्यस्य प्रदेशांतराम्नातस्य वाक्यस्य प्रदेशांतराम्नातवाक्यशेषत्वे दृष्टांता उपन्यस्यंते कुशाच्छंदस्तुत
युपगानवदिति कौषीतकिनः कुशा वानस्पत्याः स्थ ता मा पात अनिर्धारितं चौदुंबर्यः कुशा इति वाक्यं सामान्येन वान
स्पत्यत्वेनावगताः कुशा [illegible] वाक्यशेषता मापात तथा देवासुराणां छंदोभिरित्यादीनाम
विशेषेण देवासुराणां छंदसां पूर्वं देवच्छंदांसि पूर्वमिति वचनेन क्रमविशेषप्रतिपादयत्तद्वाक्यशेषतां गच्छति तथा
हिरण्येन षोडशिनः स्तोत्रमुपाकरोतीत्यविशेषेण प्राप्तस्य समयाध्युषिते सूर्ये षोडशिनः स्तोत्रमुपाकरोतीति विशेषविषयं
यद्वाक्यं तद्वाक्यशेषत्वं भजते तथा ऋत्विज उपगायंतीत्यविशेषप्राप्तस्य नाध्वर्युरुपगायेदिति वाक्यमनध्वर्युविषय
तामवगमयन् तद्वाक्यशेषत्वं भजते एवं सामान्येनावगतानां विशेषैरवस्थापयितुं तेषामन्यवाक्यस्य तच्छेषत्वमनभ्युप

धुपिते ३
भस्रंगवृषि

भा
१

श्रीमते रामानुजाय नमः ॥ श्री स्मृत्यनवकाशदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात् ॥ श्री प्रथमेऽध्याये प्रत्यक्षादिप्रमा
णगोचराच्चेतनाचेतनसंसृष्टाद्वियुक्ताच्चेतनादर्थान्तरभूतं निरस्तनिखिलाविद्याद्यःपुरुषार्थगंधमनंतज्ञानानंदैक
तानममपरिमितोदारगुणसागरं निखिलजगदेककारणं सर्वान्तरात्मभूतं परं ब्रह्म वेदान्तवेद्यमित्युक्तं अनन्तरमस्या
त्व ४ र्थस्य संभावनीयसमस्तप्रकारदुर्धर्षणत्वप्रतिपादनाय द्वितीयोऽध्याय आरभ्यते प्रथमं तावत्कापिलस्मृतिविरोधो वेदा
न्तानामतत्परत्वमाशंक्य तन्निराक्रियते कथं स्मृतिविरोधाच्छ्रुतेरन्यपरत्वं उक्तं हि विरोधे त्वनपेक्षं स्यादिति श्रुतिवि
रुद्धायास्स्मृतेरनादरणीयत्वं सत्यं औदुंबरीं स्पृष्ट्वोद्गायेदित्यादिषु स्वत एवार्थनिश्चयसंभवात् विरुद्धा स्मृतिरनादर
22 णीयेव इह तु वेदान्तवेद्यस्य तत्त्वस्य दुरवबोधत्वेन परमर्षिप्रणीतस्मृतिविरोधे सत्ययमर्थ इति निश्चयायोगात्स्मृ
त्या श्रुतेरतत्परत्वोपपादनमविरुद्धं एतदुक्तं भवति प्राचीनभागोदितनिखिलाभ्युदयसाधनभूतान्यग्निहोत्रदर्शपूर्ण
मासज्योतिष्टोमादिकर्माणि यथावदभ्युपगच्छता श्रुतिस्मृतीतिहासपुराणेषु च ऋषिं प्रसूतं कपिलमित्यादिवाक्यै
राप्तत्वेन संकीर्तितेन परमर्षिणा कपिलेन परमनिःश्रेयसतत्साधनाववोधितेनोपनिबद्धस्मृत्युपबृंहणेन वि
नाऽल्पश्रुतैर्मंदमतिभिर्वेदान्तार्थनिश्चयायोगाद्यथाश्रुतार्थग्रहणे चाप्रणीतायास्तादृशस्मृतेस्सकलाया
एवानवकाशत्वप्रसंगात्स्मृतिप्रसिद्ध एवार्थो वेदान्तवेद्य इति बलादभ्युपगमनीयमिति न च वाच्यं मन्वादिस्मृ
तीनां ब्रह्मैककारणत्ववादिनीनामेवं सत्यनवकाशदोषप्रसंग इति धर्मप्रतिपादनद्वारेण प्राचीनभागोपबृंहणे
न सावकाशत्वात् अस्यास्तु कृत्स्नायाः तत्त्वप्रतिपादनपरत्वात्तस्या अनभ्युपगमेऽनवकाशत्वमेव स्यात् तदिदमाशं

शारीरकमीमांसाभाष्यंरामानुजविरचितम्

२

तद्धर्मणां विरोधकरणे न साव[illegible]त्वं परब्रह्मभूतपरमपुरुषाराधनत्वेन धर्मान्विदधती नामेतासां सारा
ध्यभूतपरमपुरुषप्रतिपादनाऽभावे सति तदाराधनभूतधर्मप्रतिपादनाऽसंभवात् तथाहि परमपुरुषाराधन
रूपता सर्वेषां कर्मणां स्मर्यते यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानवः
ध्यायन्नारायणं देवं स्नानादिषु च कर्मसु ब्रह्मलोकमवाप्नोति न चेहावर्त्तते पुनः ये त्वत्कर्मपरे नीचे नारा
धितो भवान् ते तरंत्यखिलामेतां मायामात्मविमुक्तय इति न चैहिकामुष्मिकसांसारिकफलसाधनकर्मप्र
तिपादने नैतासां सावकाशत्वं यतस्तेषामपि कर्मणां परमपुरुषाराधनत्वमेव स्वरूपं यथोक्तं येप्यन्यदेवताभ
क्ता यजंते श्रद्धयान्विताः तेपि मामेव कौंतेय यजंत्यविधिपूर्वकं अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च न तु मामभि
23 जानंति तत्त्वेनातश्च्यवंति ते इति तथा धर्मस्त्वमिज्यसे नित्यं सर्वदेवमयाच्युत हव्यकव्यभुगेकस्त्वं पितृदेवस्वरूप
धृगिति च यदुक्तं ऋषिं प्रसूतं कपिलमिति कपिलस्याप्रतयाऽसंकीर्त्तनात्तत्स्मृत्यनुसारेण वेदार्थव्यवस्थाप
नस्याप्यमिति तदसत् कुहस्यते श्रुतिस्मृतिषु सर्वेषामतिशयितज्ञानानां निदर्शनत्वेन संकीर्त्तनात्तत्प्रणीते
न लोकायतेन श्रुत्यर्थव्यवस्थापनप्रसंगेदिति अप्रथ्यस्यात्कपिलस्य स्वयोगमहिम्ना वस्तुयाथात्म्योपलब्धे
स्तत्स्मृत्यनुसारेण वेदार्थो व्यवस्थापयितव्य इति प्रत उत्तरं पठति श्री इतरेषां चानुपलब्धेः श्री च शब्दस्तु
शंकार्थः चोदितां शंकां निवर्त्तयति इतरेषां मन्वादीनां बहूनां स्वयोगमहिमसाक्षात्कृतपरापरतत्त्वयाथात्म्या
नां निखिलजगद्भेषजभूतस्ववाक्याप्यतया यदेकिंचन मनुरवदत्तद्भेषजमित्यादिश्रुतिप्रसिद्धानां कपिल

23

कृतेस्मृत्यनवकाशदोषप्रसंगइतिचेदिति अत्रोत्तरं न। अन्यस्मृत्यनवकाशदोषप्रसंगादिति अन्याहि मन्वादिस्मृत
यो ब्रह्मैककारणतां वदंति यथाह मनुः आसीदिदं तमोभूतमित्यारभ्य ततस्स्वयंभूर्भगवानव्यक्तो व्यंजयन्निदं
महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः सोभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः अप एव ससर्जादौ
तासु वीर्यमुपासृजदिति भगवद्गीतासु च अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा अहं सर्वस्य प्रभवो मत्तस्स
र्वं प्रवर्त्तते इति च तथा च महाभारते कुतः सृष्टमिदं सर्वं जगत्स्थावरजंगमं प्रलये च कमभ्येति तन्नो ब्रूहि पिता
महेति पृष्ट्वा आह नारायणो जगन्मूर्तिरनंतात्मा सनातन इति तथा तस्माद्व्यक्तमुत्पन्नं त्रिगुणं द्विजस
त्तम अव्यक्तं पुरुषे ब्रह्मन्निष्क्रिये संप्रलीयत इति च आह च भगवान्पराशरः विष्णोस्सकाशादुद्भूतं जगत्तत्रै
व च स्थितं स्थितिसंयमकर्ताऽसौ जगतोऽस्य जगच्च स इति आह चापस्तंबः पूः प्राणिनः सर्व गुहाशयस्य अहन्यमानस्य वि
कल्मषस्येत्यारभ्य तस्मात्कायाः प्रभवंति सर्वे स मूलं शाश्वतिकस्स नित्य इति यदि कपिलस्मृत्या वेदान्तवाक्यार्थ
व्यवस्था स्यात्तदैतासां सर्वासां स्मृतीनामनवकाशत्वरूपो महानयं दोषस्स्यात् अयमर्थः यद्यपि वेदान्तवाक्यानां
मतिक्रांतप्रत्यक्षादिसकलेतरप्रमाणोऽसंभावनाभूमिभूतार्थप्रतिपादनपरत्वात्तदर्थवैशद्याय अल्पश्रुतानां
प्रतिपत्त्यर्थं तदुपबृंहणमपेक्षितं तथापि तदर्थानुसारिणीनामाप्ततमप्रणीतानामेव कीर्तनास्मृतीनां तदुपबृंह
णाय प्रवृत्तानामनवकाशतामाप्रसांक्षीदिति श्रुतिविरुद्धार्थाकपिलस्मृतिरुपबृंहणीया उपबृंहणं च श्रुति
प्रतिपन्नार्थविशदीकरणं तच्च विरुद्धार्थया स्मृत्या न शक्यते कर्त्तुमेतासांस्मृतीनां प्राचीनभागोदि